Government Oriental Library Series

Bibliotheca Sanskrita No. 41

खादिरगृह्यसूत्रम्

रुद्रस्कन्द व्याख्यासहितम्



THE

KHADIRA GRIHYASUTRA

WITH THE

COMMENTARY OF RUDRASKANDA

EDITED BY

A. MAHADEVA SASTRI, B.A.,

Curator, Government Oriental Library, Mysore

AND

L. SRINIVASACHARYA,

Pandit, Govt. Oriental Library, Mysore.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF MYSORE

MYSORE:
PRINTED AT THE GOVERNMENT BRANCH PRESS
1913

अवतरणिका.

इदमिदानीं प्रस्तूयते—

तेन स्मार्तमनुष्ठानमन्तरेण न वैदिकम्।
प्रवर्तते द्विजातीनां धर्मशुद्धिमभीप्सताम्॥

इति व्यासस्मरणेन,

चतुर्णामपि वर्णानामाचारो धर्मपालकः।
आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः॥

इति पराशरस्मरणेन च सिद्धायां स्मार्तकर्मानुष्ठानावश्यकतायां स्वस्वशाखावगतमन्त्रविनियोगद्वारेण मन्वादिप्रणीतस्यैव कर्मकलापस्य प्रयोजकैः गृह्यकारैः प्रणीतमेव गृह्यशास्त्रमनुसर्तव्यमित्यविप्रतिपन्नोऽर्थः। तथाच देवलः—

मन्वादयः प्रयोक्तारो धर्मशास्त्रस्य कीर्तिताः।
तत्प्रयुक्तप्रयोक्तारो गृह्यकारास्तु मन्त्रतः॥ इति॥

तत्र छन्दोगानां स्मार्तं धर्मं मन्त्रद्वारा समुपदिदिक्षुः तत्रभवान् खादिराचार्यः संक्षिप्तं शब्दतो विस्तृतं चार्थतः किंचन रचयामास गृह्यशास्त्रम्। गृह्यशब्दार्थस्तु—औपासनोऽग्निः गृह्यः "यस्मिन्नग्नौ पाणिं गृह्णीयात्स गृह्यः" इत्यत्रैव शासनात्, तत्साध्यानि कर्माणि गृह्याणीत्युपचर्यन्ते इति। प्राधान्येन तेषामत्रोपदेशादुक्तमस्य गृह्यशास्त्रत्वम्॥

इदं च शास्त्रं संवदति शब्दतोऽर्थतश्च प्रायशः गोभिलीयं गृह्यशास्त्रमित्यस्यैव विस्तरलक्षणं वा गोभिलीयं, आहोस्वित्

गोभिलीयस्यैव संक्षेपलक्षणं वेदमिति यद्यप्युदेति संशयः सर्वेषाम् । तथाऽपि स्मृतिसूत्रप्रवाहस्यानादिसिद्धत्वाभ्युपगमान्न वयं पारयामो विनिर्णेतुमन्यतरां कोटिम् ॥

अस्य च शास्त्रस्य श्रीमता रुद्रस्कन्दनाम्ना चिरचिताऽतिगभीरार्था वृत्तिरेकैवात्र प्रचरतीति तथैव सह शास्त्रमेतद्भीयत प्रकाशम् ॥

शास्त्रस्यास्य प्रणेतुः खादिराचार्यस्याभिजनचरणदेशक्रमयादिकं न किंचिदपि शक्यमवगन्तुम् । व्याख्यातुस्तु रुद्रस्कन्दस्य ग्रन्थान्ते परिदृश्यमानेन—

नारायणस्य पुत्रेण मखवाटनिवासिना ।
रुद्रस्कन्देन संक्षेपाद्व्याख्यातं गृह्यशासनम् ॥

इति पद्येन किंचिदिवावगम्यते, तदपि नालं निर्णयायेति ॥

अत्रत्यविषयाः सूच्यन्ते—

विषयाः	पुटसंख्या	विषयाः	पुटसंख्या
गृह्यकर्मसमुद्देशः	 1	पाकयज्ञः	 10
सामान्यतः कर्मकालः	 4	ब्रह्मा	.... ,,
यज्ञोपवीतम्	 5	उपलेपनादि	 12
आचमनम्	 6		
दर्भासनम्	 7	प्रपदान्तं प्राग्घोमीयं कर्म—	
दिग्विधिः	.... ,,	विवाहः	 18
होमस्थानम्	 8	गर्भाधानम्	... 36
स्नानम्	.... ,,	गृह्यः	 37
हस्तः	.... ,,	औपासनम्	... 38
मन्त्रः	.... ,,	वैश्वदेवः	 40

विषयाः	पुटसंख्या	विषयाः	पुटसंख्या
दर्शपूर्णमासौ	46	आप्लवनम् (स्नानम्) ...	88
आग्नेयस्थालीपाकः	54	पुष्टिकामस्योपदेशः	93
पुंसवनम्	56	उपाकर्म	97
सीमन्तोन्नयनम्	59	अनध्यायः	102
सोष्यन्तीहोमः	60	आश्वयुजीकर्म	103
निष्क्रमणम्	62	आग्रहायणम् ...	105
नामकरणम्	63	अष्टकाः	107
चौलम्	66	ब्रह्मवर्चसादि	121
उपनयनम्	70	पुष्टिकामार्थानि कर्माणि—	
गोदानादीनि व्रतानि	77	मधुपर्काहाः	136

एतद्ग्रन्थशोधनावसरे सहायीकृतानामादर्शपुस्तकानां स्थित्यादयः—

एतत्कोशालयस्थानि पुस्तकानि—

नं. 67	मूलम्	नागराक्षरमयम्	नातिशुद्धम्
नं. 1937	,,	,,	,,
नं. 1945	,,	,,	,,
नं. 2501	,,	,,	,,
नं. 2990	,,	,,	,,
नं. 57	वृत्तिः	,,	,,
नं. 2502	,,	,,	,,
नं. 3157	,,	ग्रन्थाक्षरमयम्	शुद्धम्

नं. 2673 वृत्तिः ग्रन्थाक्षरमयम् शुद्धम्

नं. B731 ,, ,, ,,

नं. B817 ,, कर्णाटाक्षरमयम् ,,

श्रीमन्महाराजसदसनस्थितसरस्वतीभण्डारान्तर्गतं

ग्रन्थाक्षरमयं व्याख्यानपुस्तकमतिशुद्धमेकम्.

आहृत्य 12 पुस्तकान्यादर्शीकृत्य यथार्हं संशोधितमिदं गृह्यशास्त्रमिति विज्ञाप्यते.



श्री

खादिरगृह्यसूत्रम्.

रुद्रस्कन्दीयव्याख्यायुतम्.

अथातो गृह्या कर्माणि ॥ १ ॥

अथ अनन्तरम्। कस्मादनन्तरम्। 'देव सवितः' इत्यादिमन्त्रवच्छाखाध्ययनात्। यतोऽनधीतवेदस्य मन्त्रापरिज्ञानात् वक्ष्यमाणेषु वाक्येषु कर्मानुष्ठानयोग्यतया प्रतिपत्तुमशक्यं, अतस्तदनन्तरमिति गम्यते । ननु—मन्त्रमात्राध्ययनादपि शक्यं प्रतिपत्तुम् । सत्यम्—यदि मन्त्रमात्राध्ययने विधिरस्यात् स्यादेवं, कृत्स्नवेदाध्ययन एव विधिप्रवृत्तेः। विध्यभावे को दोषः? इच्छानिबन्धनमध्ययनं स्यात् । तथा सत्यध्ययनस्य पुरुषप्रतिपत्त्युपायत्वात् तस्याश्च तत्साध्यपुरुषार्थपरामर्शापेक्षत्वात् मन्त्राणां चातीन्द्रियपुरुषार्थसाधनकारोपकारिप्रकाशनशक्तिसद्भावनिश्चयप्रमाणाभावेन तद्विवक्षाया असम्भवात् अवश्यमन्यविवक्षया भवितव्यम्। अन्यविवक्षया चोच्चरितस्याप्रामाण्यमाहुर्मीमांसकाः। ग्रन्थगौरवभयादस्माभिर्न लिख्यते। अप्रमाणभूतस्य च साधनत्वायोगात् न तावन्मात्राध्ययनस्य वृत्तत्वम् । वैधे त्वध्ययने 'स्वाध्यायोऽध्येतव्यः' इत्यक्षरप्रधानत्वान्निर्देशस्य संस्क्रिय-

माणाक्षरद्वारेण च पुरुषार्थावबोधनरूपप्रयोजनसिद्धिसम्भवात् स्वाध्यायाध्ययनस्य ज्ञानसंपादनद्वारा प्रामाण्यम् । वैधं त्वध्ययनं नियतक्रमत्वात् न तावन्मात्रस्य संभवति । एवमपि किमिति न तत्परस्य वृत्तत्वम् । एकत्वाद्विधेरन्तरास्थितौ विधिविरोधात् । न हि प्रधानभूतामध्ययनक्रियामपरिसमाप्य तदपेक्षिते व्यापारान्तरे प्रवृत्तिः ॥

अतश्शब्दो वक्ष्यमाणं प्रति वृत्तस्याध्ययनस्य पर्यवसानलक्षणं हेतुत्वमाह । अध्ययनविधिर्हि अर्थावबोधपर्यन्तोऽनुष्ठानयोग्यमवबोधं विना न पर्यवस्यति । 'देव सवितः प्रसुव' इत्यादिमन्त्रोत्पन्नश्च अवबोधो न गृह्यशास्त्रोपदेशं* विनाऽनुष्ठानयोग्यो भवति । अत एष सूत्रार्थः—अध्ययनानन्तरं तत्पर्यवसानादेव हेतोः गृह्याणि कर्माण्युपदेक्ष्याम इति ॥

औपासनाख्योऽग्निर्गृह्यः 'यस्मिन्नग्नौ पाणिं गृह्णीयात् स गृह्यः' इति वचनात् । तत्साध्यानि कर्माणि लक्षणया गृह्याणीत्याह । अत औपासनहोमादिषु गृह्याग्निमत एवाधिकार इत्युक्तं भवति आहृत्य विहितं वर्जयित्वा यथा 'पुनर्मामैतु' इति ब्रह्मचारिणः । चौलादीनि बालसंस्कारार्थतया तच्छेषत्वेन यद्यपि बोध्यन्ते, तथाऽपि 'पुत्रं संस्कुर्यात्' इत्येवमादिवचनात् पितुरपि तानि कृत्यान्येव । स्वकृत्यानि च सर्वाण्यग्निसाध्यान्यस्मिन्नेवाग्नौ कार्याणि अस्य सर्वसाधारणत्वेनोत्पन्नत्वात् अग्न्यन्तराक्षेपे प्रमाणान्तराभावाच्च । बालकृत्यमपि प्रसङ्गसिद्धत्वान्नाग्न्यन्तरमाक्षिपति । यदा तु सर्वाधानेन पितुरप्यग्न्यभावस्तदा

* शास्त्रोक्तं.

बालकृत्येनाक्षिप्यते लौकिकाग्निस्सर्वहोमेषु समाचारसिद्धत्वात् लौकिकस्य । पिताऽपि तस्मिन्नेवाग्नौ संस्कुर्यात् विद्यमाने गृह्ये उपात्तस्य विद्यमानत्वादुपादानक्षमः† । अत्र परसंस्कारार्थान्येकदेशं प्रणीय तस्मिन्नेव कार्याणि । समाप्तेषु तस्य लौकिकत्वमित्यस्मदुपलब्धदेशे समाचारः । यद्येवमेव समाचारस्सार्वत्रिकस्स्यात् तथैव श्रुतिकल्पनया प्रमाणं स्यात् । अथ तु देशान्तरे विगानं स्यात्, कृत्स्न एव परार्थान्यपि स्युः, नाप्यग्नेरन्ते लौकिकत्वम् । यदा त्वनग्निः पिता भार्यामरणादिना यदि शास्त्रान्तरेष्वनग्नेस्संस्कारप्रतिषेधो विद्यते तदाऽन्येन कारयेत् । अथ तु न विद्यते स्वयमेव लौकिकेऽग्नौ कुर्यात् । ननु—अन्यदीयेऽग्नावन्यः किमिति न करोति । आहवनीयादिवत् पुरुषविशेषं प्रति नियतत्वात् । यस्य यो गृह्यः स तस्यैव संस्कारयोग्यः ॥

गृह्याणीति पाठे छान्दसो लुक्कृतः छन्दस्स्तुल्यत्वमस्य शास्त्रस्य गमयितुम् । तुल्यत्वं च वेदमूलत्वेन मन्वादेवदतीन्द्रियार्थे प्रामाण्यात्, वेदमूलत्वाच्च । वेदमूलेषु स्मृतिशास्त्रेषु वेदाङ्गेषु च यद्यदस्य शास्त्रस्यापेक्षितं विद्यते तस्य तस्य सङ्ग्रहस्सिद्धो भवति, सर्वेषामध्ययनविध्याक्षिप्ततया एकविज्ञानविषयत्वात् । अपेक्षाऽभावे त्वविरोधिनामपि न समुच्चयः, परामर्शहेत्वभावेन वाक्यार्थस्य पर्यवसानात् । गृह्याणीतिसिद्धे कर्माणीतिवचनमग्नचन्तरसाध्यस्यान्वष्टक्यादेरनग्निसाध्यस्य च सङ्ग्रहार्थम् । तस्य च प्रयोजनं वक्ष्यमाणायाः परिभाषायाः साधारणत्वं सूचयितुम् । अत एष वाक्यार्थः—गृह्याण्यगृ-

† क्षयः.

ह्याणि च कर्माण्युपदेक्ष्याम इति । गृह्यसाहचर्यादगृह्याण्यप्यौपासनवत एवेति केचित् ॥ १ ॥

उदगयनपूर्वपक्षपुण्याहेषु प्रागावर्तनादह्नः कालोऽनादेशे ॥ २ ॥

यस्मिन् क्षणे मकरं गच्छति सूर्यः ततः प्रभृति षण्मासा उदगयनम् । यस्मिन् क्षणे सूर्याचन्द्रमसौ सह वसतः तत ऊर्ध्वं यस्मिन् क्षणे तयोरेव परमो विप्रकर्षः ततः प्राक्पूर्वपक्षः । ज्योतिश्शास्त्रे कर्मयोग्य यद्दहरुक्तं तत्पुण्यमहः । तयां द्वन्द्वसमासः । अन्वये तेषामितरेतरयोगमाह विभाक्तेः । अतो येषु कर्मसु समुच्चितानामन्वयः सम्भवति तेषु समुच्चितानामेवाङ्गत्वं, येष्वसम्भवस्तेषु यथासम्भवं द्वयोरेकस्य वाऽन्वयः । ननु—सकृदुच्चरितस्य कथमनेकधाऽन्वयः। सर्वकर्मणामधिकृतत्वादर्थादावर्तते पदं, इतरेतरयोगविवक्षया च । समुच्चयसम्भवेऽपि यज्ञज्योतिश्शास्त्रे निषिद्धमहस्तद्वर्जनीयं उदगयनपूर्वपक्षावनादृत्या पि दोषहेतुत्वात् । मध्यंदिनादूर्ध्वमहरावर्तनीमित्याहुः। ततः प्राग्ग्रहणं वक्ताभावेऽप्यावृत्तिरस्ति अह्न इति विशेषणम् । ननु—प्रातराहुतिं हुत्वा हविर्निर्वपेदित्यनेनैव सिद्धम् । न सिद्ध्यति पूर्वकालनिषेधपरत्वात्तस्य । अपि च 'सर्वमहः प्रातराहुतेस्स्थानम्' इतिवचनात् अपराह्णेऽपि स्यात् । काल इति यथाऽन्ये दर्शादयः काला अधिकारहेतवः तथाऽयमभियुक्तः कालोऽधिकारहेतुर्नाङ्गमात्रमिति ज्ञापयितुम् । अतोऽन्यकाले कृतमकृतमेव, न विगुणमात्रम्। विशेषादेशस्य बलीयस्त्वेसिद्धे अनादेश इति शास्त्रान्तरादेशस्य सङ्ग्रहणार्थम् । तत्र विरुद्धानां विकल्पः । यथा विवाहे सर्वकालत्वं, उपनयने च पञ्चम-

वर्षादि । अविरुद्धानां समुच्चयः यथोपनयने वसन्तादि, सर्वेषु च मुहूर्तादि । एवं सर्वत्र ॥ २ ॥

अपवर्गे यथोत्साहं ब्राह्मणानाशयेत् ॥ ३ ॥

अधिकारप्रयोगे समाप्ते यथाश्रद्धं त्रयवरान् ब्राह्मणान् भोजयेत् ॥ ३ ॥

यज्ञोपवीतम् ॥ ४ ॥

कर्माङ्गं स्यादिति शेषः । नित्ये विद्यमानेऽपि यज्ञोपवीतान्तरं प्रसङ्गात्सिद्धम् ॥ ४ ॥

सौत्रम् ॥ ५ ॥

तद्यज्ञोपवीतं कार्पाससूत्रकृतं रज्जुर्वासो वा । स्मृत्यन्तराच्छेषावगतिः ॥ ५ ॥

कौशं वा ॥ ६ ॥

कुशविकारः कौशम् ॥ ६ ॥

ग्रीवायां प्रतिमुच्य दक्षिणं बाहुमुद्धृत्य यज्ञोपवीती भवति ॥ ७ ॥

तत्सौत्रं कौशं वा पाशाकृतिं कृत्वा ग्रीवायामासज्य दक्षिणं बाहुमुद्धृत्य तस्याधस्तादवलम्बमानं कृत्वा यज्ञोपवीती भवति । विन्यासविशेषयुक्ते अस्मिन् द्रव्ये यज्ञोपवीतशब्दो वर्तते, तदर्थे द्रव्ये उपचारात् ॥ ७ ॥

सव्यं प्राचीनावीती ॥ ८ ॥

ग्रीवायां प्रतिमुच्य सव्यं बाहुमुद्धृत्य प्राचीनावीती भवति। एतत् पित्र्ये, स्मृत्यन्तरात्। "उपासने गुरूणां वृद्धानामतिथीनां च होमे जप्यकर्मणि भोजने आचमने स्वाध्याये च यज्ञोपवीती स्यात् अन्येष्वप्येवंप्रकारेषु भवति" इति व्याप्त्यर्थं, गृह्यशास्त्रे विहितादन्यत्राप्येतद्वयमङ्गमिति। निर्वीतिता नोक्ता, अस्मिंच्छास्त्रे निवीतिना कृत्यं नास्तीति। केचित्—'वायसान् वधकामः' इत्यत्र निवीतित्वमिच्छन्ति वधकामे श्येनयागे दर्शनात्। तदर्थं च "ग्रीवायां प्रतिमुच्य" इति सूत्रं विच्छिद्य "निवीतो भवति" इत्यध्याहरन्ति ॥ ८ ॥

सर्वकर्मणामङ्गमाचमनं आदौ कर्तव्यम्। तदाह--

त्रिराचम्यापो द्विः परिमृजीत ॥ ९ ॥

उदकं त्रिरङ्गुष्ठमूलतलेन पीत्वाऽङ्गुष्ठमूलतलेना लोमप्रदेशाद्विहिः परित ओष्ठौ द्विः परिमृजीताद्भिः ॥ ९ ॥

पादावभ्युक्ष्य शिरोऽभ्युक्षेत् ॥ १० ॥

पादौ युगपदभिमुखं प्रोक्षेदद्भिः। पृथक्सूत्रकरणं पूर्वोत्तरसूत्राभ्यां वैलक्षण्यं गमयितुम्। वैलक्षण्यं च पाण्यवयवविशेषानपेक्षत्वम् ॥ १० ॥

इन्द्रियाण्यद्भिस्संस्पृशेत् ॥ ११ ॥

अङ्गुष्ठानामिकाभ्यां चक्षुषी। अङ्गुष्ठप्रदेशनीभ्यां नासिके। अङ्गुष्ठकनिष्ठिकाभ्यां श्रोत्रे। अप इत्यधिकारात्सिद्धे अद्भिरिति

प्रत्यङ्गमभ्रहणार्थम् । इन्द्रियाणीति सामान्योक्तावपि पादयोः पृथग्ग्रहणात् पाय्वादीनामग्रहणमयोग्यत्वात्, मनसश्चाशक्यत्वात्, त्वचस्सर्वगतत्वात् सिद्धेः, जिह्वायाश्च पाने । पारिशेष्यात्त्रयाणामेव ॥ ११ ॥

अन्ततः प्रत्युपस्पृश्य शुचिर्भवति ॥ १२ ॥

प्रत्युपस्पृश्येत्युक्ते पूर्वोक्तानां प्रत्येकं स्यात् अतोऽन्तत इत्युक्तम् । उपस्पृश्येति सिद्धे प्रतीति पूर्वमप्युपस्पर्शनमस्तीति सूचयितुम् । पूर्वमुपस्पर्शनमपेक्ष्य प्रत्युपस्पर्शनं भवति । तच्च स्मृत्यन्तराद्गम्यते—'आमणिबन्धनात्पाणी प्रक्षाल्य' इति । तत्परामर्शे च तत्सहचरितानां "प्राङ्मुख उदङ्मुखो वा शौचमारभेत, शुचौ देशे आसीनो दक्षिणं बाहुं जान्वन्तरा कृत्वा यज्ञोपवीती वाग्यतः, हृदयस्पृशः, अनुष्णाभिरफेनाभिराद्भिः, तीर्थेन पादौ प्रक्षाल्य" इत्येवमादीनामपि परामर्शस्सिद्धो भवतीति तैस्समुच्चयः । पादप्रभृति क्रियाविशेषाणां निरपेक्षश्रवणान्मुखमार्जनादीनां निवृत्तिः । शुचिरिति न केवलं कर्माङ्गभाव एवाचमनम्, अप्रायत्ये सति शुद्ध्यर्थमपि भवतीति वेदितव्यम् । भवतीति यज्ञोपवीती भवतीतिवत् ॥ १२ ॥

आसनस्थानसंवेशनान्युदगग्रेषु दर्भेषु ॥ १३ ॥

कुर्यादिति शेषः । विध्युपदिष्टानि नार्थप्राप्तानि आसनादीनि, वचनस्यान्यथावैयर्थ्यात् ॥ १३ ॥

प्राङ्मुखस्य प्रतीयात् ॥ १४ ॥

प्राङ्मुख इत्युक्ते कुर्यादित्यध्याहारे कर्तुरेव प्राङ्मुखत्वं स्यादिति सर्वस्यैव कर्मसम्बन्धिनः प्राङ्मुखत्वं विधातुं सम्बन्धमात्रवाचिनीं षष्ठीमाह यथा चौले मातुः । वाक्यशेषात्सिद्धे प्रतीयादिति मधुपर्के दातुश्चौले नापितस्य प्रत्यङ्मुखत्वनियमार्थं प्राङ्मुखस्य प्रति अभिमुखमियात् गच्छेदित्यर्थः ॥ १४ ॥

पश्चादग्नेर्यत्र होमस्स्यात् ॥ १५ ॥

यस्मिन् प्रदेशे होमो विद्यते तत्र प्रधानमङ्गानि च पश्चादग्नेरुपविश्य कुर्यात् । स्यादिति व्याप्तयर्थं भवतीतिवत् ॥ १५ ॥

सहशिरसं स्नानशब्दे ॥ १६ ॥

प्रतीयादिति शेषः, स्नातामहतेन स्नाप्य कुमारं इत्यादौ । स्नान इत्येव सिद्धे शब्द इति 'गृह्यात्मानमभिषिञ्चेत्' इत्यत्र शिरस्यभिषेकार्थम् । इतरथा सेकमात्रमिदं न स्नानमिति न शिरसि स्यात् । स्नाने स्नानतुल्यवाचिनि शब्दे इति सूत्रार्थः ॥ १६ ॥

दक्षिणेन पाणिना कृत्यमनादेशे ॥ १७ ॥

कुर्यादित्यध्याहारात्सिद्धे कृत्यमिति गृह्योक्तादन्यदपि यत्कृत्यं तदपि दक्षिणेनैव हस्तेन कुर्यादित्येवमर्थम् । आदेशबलीयस्त्वात्सिद्धे अनादेश इति पदार्थस्वभावादेशेऽपि निवृत्त्यर्थम्, यथा परिदध्यादित्यादौ द्वयोः पाण्योः ॥ १७ ॥

मन्त्रान्तमव्यक्तं परस्यादिग्रहणेन विद्यात् ॥

मन्त्रान्तं, अव्यक्तं च विनियोगतः पारिमाणतश्च । परस्येत्यस्याकाङ्क्षावशात् द्वावर्थौ, उत्तरस्य मन्त्रस्येत्येकः, प्रधानस्य मन्त्र-

बोध्यस्यार्थस्येति द्वितीयः। आदिश्च ग्रहणं चादिग्रहणम्। यथा-सङ्ख्येनान्वय. । एष सूत्रार्थः । मन्त्रान्तमुत्तरस्यादिना विद्या-दव्यक्तं विनियोगतः परिमाणतश्च अर्थवशेन विनियुक्तं परि-माणयुक्तं च विद्यादिति। अविनियुक्तो हि मन्त्रोऽध्ययनसंस्कृतः कार्यविशेषसम्बन्धाकाङ्क्षः कर्मविशेषार्थानां मन्त्राणां सन्निधावान्ना यमानस्तत्कर्मशेषभावं प्रतिपद्यते, सन्निधिविशेषादपर्यवसा-नाच्च। तस्मिन्नापे कर्मणि यत्पदार्थप्रकाशनसमर्थो यस्स तस्यैव शेषः, सामर्थ्यविशेषात्। यस्त्वतत्प्रकाशकः स तत्प्रकाशक एव जपतया आशीर्वादतया वोपयुज्यते। आकाङ्क्षादिवशाच्चेयत्ता-परिच्छेदो मन्त्रस्य ॥ ननु परस्य ग्रहणेऽनेनैव परिमाणस्याप्यु-क्तत्वात् अन्तमादीत्यनेन किम्! उच्यते—द्वयोर्मन्त्रयोर्मध्यगतस्य यस्य पदस्याभिधानकोऽन्वयो न केनचिदवगम्यते, तस्या-वश्यमेकेनान्वयः कल्प्यः, अन्यथा तस्यानर्थक्यं स्यात्। यस्य वा द्वाभ्यामपि केनापि प्रकारेणान्वयो दृश्यते तस्याप्येकेनैवान्वयः आकाङ्क्षापूर्तेरेकत्वाच्चावगम्यते। एतदुक्तं भवति—उत्तरमन्त्रादेः प्राक् पूर्व एव मन्त्रोऽनन्वयि यत्किञ्चित्पदमित्येकोऽर्थः। उत्तर-मन्त्रादेः प्रागेव पूर्वमन्त्रो नोत्तरादिसहित इति द्वितीयः। म-ध्यमं पदं किं पूर्वेण सम्बध्यते उतोत्तरेणेति सन्देहे कल्पनाला-घवाद्विशेषाध्यवसायः। अस्यार्थस्य न्यायसिद्धेर्न दोषः, नैयायिक-त्वात् सूत्रस्य। वाक्यशेषात्सिद्धे विद्यादिति न स्वरुच्या कल्पयेत्, न्यायसिद्धमेव जानीयादित्येवमर्थम् ॥ १८ ॥

स्वाहान्ता मन्त्रा होमेषु ॥ १९ ॥

ये पाठेन स्वाहान्ताः तेऽपि स्वाहान्ताः कार्याः। 'स्वाहा सोमाय पितृमते स्वाहाऽग्नये कव्यवाहनाय' इत्यत्र न स्वाहा-

न्ताः, आद्येनैव कृतार्थत्वात्, 'पुरस्तात्स्वाहाकृतयो वा अन्ये देवा उपरिष्टात्स्वाहाकृतयोऽन्ये'* इति श्रुतेः । अधिकारात्सिद्धे मन्त्रा इति व्याप्तयर्थम् ॥ १९ ॥

पाकयज्ञ इत्याख्या यः कश्चैकाग्नौ ॥ २० ॥

संज्ञा व्यवहारार्था । एकाग्निः गृह्याग्निः । एकाग्निग्रहणं अन्याग्निसाध्यानां संज्ञानिवृत्त्यर्थम् । यः कश्चेति 'सप्त पाकयज्ञसंस्थाः' इति दर्शनात् तद्व्यतिरेकार्थं शास्त्रान्तरोक्तसङ्ग्रहार्थं च ॥ २० ॥

तत्रर्त्विक् ब्रह्मा सायंप्रातर्होमवर्जम् ॥ २१ ॥

तत्र तास्मिन्नेव पाकयज्ञे नान्यत्र । अतो मथिते लौकिके वा न ब्रह्मा । ऋत्विगिति 'आर्षेयोऽनूचानः' इत्यादृत्विग्गुणनियमार्थम् ॥

स्वयं हौत्रम् ॥ २२ ॥

सायंप्रातर्होमवर्जमित्यनुवर्तते, इतरथा सूत्रानर्थक्यं स्यात् । तथा हि सर्वहोमेषु स्वामिनो होमकर्तृत्वं न विधेयं नित्यप्राप्तत्वात् । सायंप्रातर्होमे स्वामिनोऽन्यस्यापि कर्तृत्वाभ्यनुज्ञानार्थं सूत्रं, तदधिकारार्थमेव हि ब्रह्मासनमनुक्त्वैतदुक्तम् ॥ २२ ॥

दक्षिणतोऽग्नेरुदङ्मुखस्तूष्णीमास्ते ब्रह्माऽऽहोमात्प्रागग्नेषु ॥ २३ ॥

अग्नेर्दक्षिणतः, न होतुः । तूष्णीं वाग्यतः । आ होमात् प्रयोगसमाप्तेः ॥ २३ ॥

---

* तै. सं. ३-१-५.

कामं त्वधियज्ञं व्याहरेत् ॥ २४ ॥

यज्ञोपकार्यन्तरितादि ब्रह्मा ब्रूयात् । अत एव कर्मविदेव ब्रह्मा । कामं त्विति लौकिकस्यापि कर्मोपकारिणो व्याहरणार्थम् ॥

अयज्ञीयां वा व्याहृत्य महाव्याहृतीर्जपेत् ॥

वाशब्दात् यज्ञियामप्यन्यथासिद्धाम् । जपेत् मनसा । व्याहृतय एव महाव्याहृतयः । इदं विष्णुः इति वा ऋचम् ॥ २५ ॥

हौत्रब्रह्मत्वे स्वयं कुर्वन् ब्रह्मासनमुपविश्य छत्रमुत्तरासङ्गं कमण्डलुं वा तत्र कृत्वाऽथान्यत्कुर्यात् ॥ २६ ॥

आपत्कल्पोऽयम् । उत्तरासङ्गं उत्तरीयं वासः । अथान्यदिति ब्रह्मोपवेशनात्पूर्वं निर्वृत्तं यत्कर्म तदनन्तरं विहितं यदवशिष्टं तदित्यर्थः । अत एव न कर्मादौ ब्रह्मोपवेशनम् । क्व तर्हि ? 'इदं भूमेः' इत्यस्यानन्तरमेव वक्ष्यामः ॥ २६ ॥

अव्यावृत्तिं यज्ञाङ्गैरव्यवायं चेच्छेत् ॥ २७ ॥

होमाङ्गैस्सहाग्नेः पराङ्मुखो न भवेत्, अन्तरा च न गच्छेदित्यर्थः । कुर्यादित्यध्याहारात्सिद्धे इच्छेदिति, यदि प्रमादाद्व्यावृत्तिं व्यवायं वा कुर्यात् तदा पुनः प्रतिमुखः स्यात्, प्रत्यागच्छेदित्येवमर्थम् । पाकयज्ञसाधारणमिदं सूत्रम् । एवमुक्ता परिभाषा ॥२७

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ प्रथमस्य पटलस्य प्रथमः खण्डः ।

पूर्वे भागे वेश्मनो गोमयेनोपलिप्य तस्य मध्यदेशे लक्षणं कुर्यात् ॥ १ ॥

गृहस्याभिमुखे गृहैकदेशे भागे पूर्वोपलिप्तेऽपि स्वयं गोशकृतोपलिप्य उपलिप्तस्य मध्यदेशे लक्षणं कुर्यात् । लक्षणस्य स्वरूपमन्यतोऽवगन्तव्यम् । पांसुभिः स्थण्डिलं कुर्यादित्यर्थः ॥ १ ॥

दक्षिणतः प्राचीं लेखामुल्लिख्य ॥ २ ॥

स्थण्डिलस्य दक्षिणापरकोणादारभ्य प्रागपवर्गां रेखामुल्लिखेत् ॥ २ ॥

तदारम्भादुदीचीं तदवसानात्प्राचीं तिस्रो मध्ये प्राचीः ॥ ३ ॥

पार्श्वयोरेखारम्भादुत्तराः तिस्रः । कुतः 'अपिर्यं सर्वं प्रागपवर्गमुदगपवर्गं वा' इति स्मृतिबाहुल्यात् । एवं सर्वत्रानादेशे ॥

तदभ्युक्ष्य ॥ ४ ॥

उल्लिखितं स्थण्डिलमद्भिरभ्युक्ष्य ॥ ४ ॥

अग्निमुपसमाधाय ॥ ५ ॥

स्थण्डिलस्य मध्ये अग्निमसंमुखमभिमुखं निधाय । उपेत्युपयोगाय यत्र यत्र शास्त्रेणाहोमार्थोऽप्यग्निर्निधीयते तत्र तत्रोपलेपनाद्यवंनिधानान्तं कुर्यादित्येवमर्थं, यथा सर्पबलौ । इतरथा 'सर्वत्रैतद्धोमेषु कुर्यात्' इति वचनात् अहोमार्थे न स्यात् ॥ ५ ॥

इमं स्तोममिति परिसमूह्य तृचेन ॥ ६ ॥

निधीयमानस्याग्नेः प्रकीर्णान् कणान् समन्तत एकीभावं प्रापय्य प्रत्यृचं परिसमूहनं प्रागुपक्रममुदगपवर्गं कुर्यात्, निराकाङ्क्षत्वादृचाम् । अस्य विनियोगमात्रपरत्वान्नार्थैक्यकल्पनायां प्रभुत्वम् ॥ ६ ॥

पश्चादग्नेर्भूमौ न्यञ्चौ पाणी कृत्वेदं भूमेरिति ॥

अग्नेरनन्तरमेव पश्चात्तृणादिभिस्सहितौ भूमिगतावबाङ्मुखौ हस्तौ कृत्वा 'इदं भूमेः' इते जपेत् । 'अन्येषां विन्दते वसु, अन्येषां विन्दते धनम्' इत्यनयोस्तुल्यार्थत्वात् विकल्पेन मन्त्रान्तत्वम् ॥ ७ ॥

तयोर्नियममाह—

वस्वन्तं रात्रौ ॥ ८ ॥

रात्रिकाले विहितं यद्रात्रौ क्रियते तत्र वस्वन्तमेव । अनन्तरं ब्रह्मोपवेशनम् । कुतः ? अग्निनिधानात्पूर्वं तावन्नोपवेशनं 'दक्षिणतोऽग्नेः' इति वचनात् । परतोऽपि 'उपसमाधायसमूह्य न्यञ्चौ पाणी कृत्वेदं भूमेः' इति क्त्वाप्रत्ययेन समानकर्तृकत्वस्योक्तत्वादवान्तरप्रयोगैकवाक्यत्वावगतेर्बाधान्नोपवेशनम् । इदानीं तु विरोधाभावाद्वक्ष्यमाणस्य ब्रह्मापेक्षत्वादुपवेशनम् । पूर्वोक्तानां सूत्रैक्ये पि सुखबोधार्थं सूत्रावच्छेदः कृतः ॥ ८ ॥

पश्चाद्दर्भानास्तीर्य दक्षिणतः प्राचीं प्रकर्षेदुत्तरतश्च ॥ ९ ॥

अग्नेः पश्चात् । प्रागग्रान् दर्भान् निरन्तरानास्थण्डिलमुदगपवर्गान् प्रकीर्य दक्षिणतः प्रकीर्णानग्रेषु गृहीत्वा प्राचीं प्रकृष्य

तथोत्तरतश्च प्रकर्षेत् । यथाऽग्नेः पुरस्तादग्राणि सङ्गतानि स्युः । अयमेकः कल्पः ॥ ९ ॥

अप्रकृष्य वा ॥ १० ॥

पश्चात्स्तरणमात्रमेवैकः कल्पः ॥ १० ॥

पूर्वोपक्रमं प्रदक्षिणमग्निं स्तृणुयान्मूलान्यग्रै-रिछादयंस्त्रिवृतं पञ्चवृतं वा ॥ ११ ॥

अग्नेः पुरस्तात् पूर्वं ततो दाक्षिणतस्तत उत्तरतस्ततः पश्चात् । ननूत्तरतस्समापनीयं 'प्रदक्षिणम्' इति वचनात् । न, 'मूलान्यग्रै-रिछादयन्' इति वचनात् । उदग्पवर्गे हि मूलैरग्राणि छादितानि स्युः । ननु अग्राण्युत्क्षिप्य किमिति न स्तरणं, 'छादयन्, स्तृणुयात्' इति स्तीर्यमाणावस्थायामेव स्तीर्यमाणैरिछादनोपदेशात् । एवं तर्हि 'मूलान्यग्रैरिछादयन्' इत्यनेनैन सिद्धत्वात् 'पूर्वोपक्रमं प्रद-क्षिणम्' इत्यनर्थकम् । न, अन्यदपि यत् प्रतिदिशं तत्पूर्वोपक्रमं प्रदक्षिणमिति ज्ञापनार्थं, यथा 'प्रतिदिशमुपलिम्मेत्' इति । अत्रापि स्पष्टीकरणार्थत्वात् अत्रैवोक्तम् । अत्र तु 'प्रथमं दक्षिणतस्तत उत्त-रतः' इत्यपि प्रदक्षिणशब्दस्यार्थोऽवगन्तुं शक्यते । इदं स्तरणं त्रिः कृत्वः पञ्चकृत्वो वा । पूर्वसूत्राभ्यां विहिते सकृत्सकृदेव । पितृयज्ञे-ष्वाद्यं स्तरणम्, अन्वष्टक्ये द्वितीयम्, इतरत्र तृतीयामित्युपदेशः । तृतीये पञ्चवृतपक्षस्य प्रजाकामपशुकामयोर्निवेशः ॥ ११ ॥

उपविश्य दर्भाग्रे प्रादेशमात्रे प्रच्छिनत्ति न नखेन पवित्रे स्थो वैष्णव्याविति ॥ १२ ॥

उपविश्येतोतः परं दर्भासनार्थम्। प्रच्छिनत्ति न पाणिना। 'ओषधिमन्तर्धाय' इति गृह्यान्तरे ॥ १२ ॥

अद्भिरुन्मृज्य विष्णोर्मनसा पूते स्थ इति ॥ १३ ॥

उत् ऊर्ध्वम् ॥ ॥ १३ ॥

उदगग्रे अङ्गुष्ठाभ्यामनामिकाभ्यां च सङ्गृह्य त्रिराज्यमुत्पुनाति देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिरिति ॥ १४ ॥

मन्त्रस्यापि त्रिरावृत्तिः, प्रदेशान्तरे 'द्विस्तूष्णीम्' इति, यत्रान्तरात्। उत्पुनाति प्राचीमूर्ध्वं क्षिपति। अच्छिद्रेण पवित्रेणेति संश्लिष्टयोस्समुदायमाह ॥ १४ ॥

अभ्युक्ष्यैते अग्नावनुप्रहरेत् ॥ १५ ॥

अद्भिरभ्युक्ष्य पावेत्र उदगग्रे अग्नौ प्रक्षिपेत्। अन्विति उत्पवनेऽनुगते उदगग्रे इत्यर्थः ॥ १५ ॥

आज्यमधिश्रित्योत्तरतः कुर्यात् ॥ १६ ॥

अग्नेरुत्तरे भागे स्थाल्या सहाज्यमुपनिधाय कुर्यात्। किं कुर्यात्? शास्त्रान्तराद्गम्यते—द्विरुलमुकेनाभिज्वाल्य द्वे दर्भाग्रे प्रक्षिप्य त्रिरुलमुकेन प्रदक्षिणं परिहृत्य उत्तरतो बर्हिषि निदध्यादित्यर्थः ॥ १६ ॥

दक्षिणजान्वक्तो दक्षिणेनाग्निमदितेऽनुमन्यस्वेत्युदकाञ्जलिं प्रसिञ्चेत् ॥ १७ ॥

दक्षिणेन जानुना भूमिगतो ब्रह्माग्न्योरन्तरेण उदकपूर्णमञ्जलिमवसिञ्चेत् ॥ १७ ॥

अनुमतेऽनुमन्यस्वेति पश्चात् सरस्वत्यनुमन्यस्वेत्युत्तरतः ॥ १८ ॥

होमाङ्गानामप्युत्तरतः । रेखावदञ्जलिसेकः, दृष्टानुगुण्याददृष्टे कल्पनात् यतः ॥ १८ ॥

देव सवितः प्रसुवेति प्रदक्षिणमग्निं पर्युक्षेदभिपरिहरन् हव्यम् ॥ १९ ॥

प्रसिञ्चेदिति प्रकृते पर्युक्षेदिति एतावत एव पर्युक्षसंज्ञार्थं 'पर्युक्षणवर्जम्' इत्यत्र होमाङ्गं सर्वमन्तर्भावयन् । प्रागुपक्रममुदकाञ्जलिं पर्युक्षेत् ॥ १९ ॥

सकृत्त्रिर्वा ॥ २० ॥

सकृन्मन्त्रमुक्त्वा त्रिर्वा पर्युक्षेत् ॥ २० ॥

समिध आधाय ॥ २१ ॥

औदुम्बराः खादिराः पालाशा वा तदभावे यज्ञियाः पञ्चदश समिधोऽग्नावाधाय एकामुत्तरतो बर्हिषि निदध्यादित्यध्याहारश्शास्त्रान्तरात् । अनन्तरमग्नेरर्चनमाचारात् ॥ २१ ॥

प्रपदं जपित्वोपताम्य कल्याणं ध्यायन् वैरूपाक्षमारभ्योच्छ्वसेत् ॥ २२ ॥

'तपश्च तेजश्च' इत्यारभ्य 'ब्रह्मणः पुत्राय नमः' इत्येवमन्तस्य प्रपदशब्दो वाचकः । जपित्वेति जपन्नित्यर्थः, 'विरूपाक्षोऽसि' इत्यस्य प्रपदमध्यपातित्वात् पौर्वापर्यानुपपत्तेः । कल्याणशब्दोऽपवर्गवाचकः । निरुच्छासो भूत्वा प्रपदं जपन् 'भूर्भुवस्स्वरोम्' इत्योङ्कारे परमात्मज्ञानं मे भूयादिति ध्यायन् यथासामर्थ्यमोङ्कारं प्लावयित्वा 'विरूपाक्षोऽसि दन्ताज्रिः' इत्युच्छ्वसेदित्यर्थः । नित्येष्वेवम् ॥ २२ ॥

काम्येष्वाह--

प्रतिकामं काम्येषु ॥ २३ ॥

काम्यग्रहणमुपलक्षणं प्रज्ञातसाध्यविशेषवतां कर्मणाम् । तेषु विशेषमेव परामृश्य इदं मे भूयादिति ध्यायन्नित्यर्थः ॥ २३ ॥

सर्वत्रैतद्धोमेषु कुर्यात् ॥ २४ ॥

सर्वत्रेति व्याप्त्यर्थम् । एतत् उपलेपनादि प्रपदान्तं सर्वं पदार्थजातं सर्वत्र होमात्मके कर्मणि तत्तद्विशेषेभ्यः प्रागेव कुर्यात् । यानि तु धृतेऽग्नौ तस्मिन्नेव देशे क्रियन्ते तेष्वर्थलोपादग्न्युपसमाधानान्तस्य निवृत्तिः ॥ २४ ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ प्रथमपलटस्य द्वितीयः खण्डः.

ब्रह्मचारी वेदमधीत्योपन्याहृत्य गुरवेऽनुज्ञातो दारान् कुर्वीत ॥ १ ॥

ब्रह्म वेदः, वेदाध्ययनार्थानि गोदानादीनि व्रतान्यग्नीन्धनादीनि च स्मृतिकारैरुक्तानि लक्षणया ब्रह्मेत्युच्यन्ते । तान्यनुतिष्ठन्नेकां शाखामधीत्याध्ययनप्रयोगमर्थनिश्चयपर्यन्तं षडङ्गं परिसमाप्य उप गुरुसमीपं निष्पाद्य स्वयं गुरवेऽभिलषितद्रव्यमार्जयित्वा तत् गुरुसमीपमाहृत्य गुरवे आचार्याय दत्वा तेनैव गुरुणा त्वं विवाहं स्नानं च कुर्वित्यनुज्ञातस्सन् दारान् कुर्वीत भार्यां कुर्वीत यथाऽऽत्मानं प्रति भार्या भवति तथा कुमारीं संस्कुर्यादित्यर्थः । दारानिति बहुत्वपुंस्त्वे अविवक्षिते । आविष्टलिङ्गवचनत्वात् । एवं वृत्त्यर्थेऽध्यापने । अदृष्टार्थे तु गुरुदक्षिणामदत्वाऽप्यनुज्ञामात्रादेव विवाहः । 'सहस्रं श्वेतं चाश्वं प्रदायानुज्ञातो वा' इति श्रुतेः । तदर्थं चोपन्याहृत्य गुरवेऽनुज्ञातो वेति वाशब्दं केचिदध्याहरन्ति । दक्षिणात्वान्नोदकपूर्वमिदं दानम् ॥

अपरा व्याख्या वाशब्दाध्याहारेण—ब्रह्मचारी वेदं वाऽधीत्येति । द्वादशवार्षिकं षट्त्रिंशदाब्दिकं तदर्धिकं पादिकं वा ब्रह्मचारी व्रतं ब्रह्म तच्चरित्वा वेदं सकलमनधीत्यापि विवाहः । अथवा व्रतं चरित्वा वेदं सकलमधीत्य विवाह इति । अस्मिन् व्याख्याने नार्थावबोधपर्यन्तमध्ययनम् । केचिदाहुः—

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैविद्यकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥

इत्यस्मिन्मानवे श्लोके वेदत्रयार्थत्वेन षट्त्रिंशदादेरुक्तत्वात्, 'वेदानधीत्य वेदौ वा वेदं वाऽपि' इति चानेनैवोक्तत्वात्,

वेदह्रासवशात् काले ह्रासोऽप्युक्त एवेति त्रिवर्षादिचरणमप्यनुज्ञातमेवेति । तयुक्तमयुक्त वेति विचारणीयम । ब्रह्मचारीत्यस्यापरा व्याख्या—वेदव्रतानि चत्वारि गोदानं व्रातिकं आदित्यव्रतं माहानाम्निकामित्येतानि, गोदानं व्रातिकं आदित्यव्रतं माहानाम्निकमौपनिषदमित्येतानि वा ब्रह्म तच्चरित्वा विवाह इति । अस्यार्थस्य न्यायमूलत्वं केचिदाहुः—ब्रह्मचारिव्रतानि पुरुषसंस्कारार्थानि नाध्ययनाङ्गानि पुरुषोद्देशेन विधानात् । अतस्तद्विधिपर्यवसाननिबन्धनोऽयं व्रतस्नानोपदेशः । अध्ययनविधिरपि न विचारपर्यन्तः, रागत एव तत्सिद्धेः । अतस्तन्निबन्धनो वेदस्नानोपदेश इति । तदिदं मीमांसकैर्नेष्यते । वाक्यशेषात्सिद्धे कुर्वीतेति नान्दीमुखादेरुपसङ्ग्रहणार्थम् ॥ १ ॥

आप्लवनं च ॥ २ ॥

उपन्याहृत्य गुरवेऽनुज्ञातः कुर्वीत इत्यस्यानुकर्षणार्थश्चकारः । आप्लवनं स्नानं समावर्तनम् । दाराप्लवने इति वक्तव्ये पृथग्ग्रहणं पृथक्प्रयोगार्थम् । अत एव कालोऽपि भिद्यते । व्युत्क्रमस्तु दाराधिगन्तुरेवाप्लवनं न नैष्ठिकस्य इत्येवमर्थम् । इतरथा ह्यध्ययनपरिसमाप्तिनिमित्तमाप्लवनमित्युपशङ्क्येत ॥ २ ॥

तयोराप्लवनं पूर्वम् ॥ ३ ॥

जायापत्योर्विवाहात्पूर्वमाप्लवनं कर्तव्यं, तत् पुरुषस्य मन्त्रक्रमानुसारेण परस्ताद्वक्ष्यते 'आप्लवने पुरस्तात्' इत्यारभ्य ॥ ३ ॥

स्त्रियास्त्वाह—

मन्त्राभिवादात्तु पाणिग्रहणस्य पूर्वं व्याख्यातम् ॥ ४ ॥

वध्वाः पाणिर्गृह्यतेऽस्मिन्निति पाणिग्रहणं विवाहः । विवाहस्य काले वध्वा आप्लवनं मन्त्रलिङ्गानुसारेण कर्तव्यमिति सूत्रार्थः । तुशब्दो विशेषणार्थः । यद्यप्याप्लवनं स्नानं प्रसिद्धं, तथाऽपीह वध्वा उपस्थाप्लवनमात्रे आप्लवनशब्दः मन्त्राभिवादादिति । पूर्वमिति यत् पूर्वमाप्लवनं पूर्वमन्त्रद्योतितसुरासाधनकं तदेवोत्तरमन्त्राभ्यामपि कर्तव्यमित्येवमर्थम् । अत एव मध्वाज्यशब्दाभ्यामपि सुरैव लक्षणयोच्यते । सुरेति चात्र पिष्टसंयुक्तमुदकं लक्षणया पैष्टीसुरासादृश्यादुच्यते, मुख्यसुराया, अस्पृश्यत्वात्, अनाचाराच्च । वीति विविक्तवाचि । विविक्तकर्तृकं पाणिग्राहकज्ञातिकर्तृकमिदमाप्लवनमित्यर्थः । अमुमिति मन्त्रे च पत्युः परोक्षवन्निर्देशादप्ययमर्थो विज्ञायते । अध्याहारात्सिद्धे आख्यातमिति यदपि वृद्धैरन्यदाख्यातं तदपि कर्तव्यमिति । किं तत्? नान्दीमुखं कौतुकबन्धनं सङ्कल्पः इत्येवमादि । एवं प्रयोगः—विवाहादेवसात्पूर्वेद्युः पूर्वाह्णे नान्दीमुखश्राद्धं कुर्यात् । युग्मान् ब्राह्मणान् प्राङ्मुखानुदगग्रेषु दर्भेषूपवेश्य नन्दीमुखेभ्यः पितृभ्यस्स्वाहा नान्दीमुखेभ्यः पितामहेभ्यस्स्वाहा नान्दीमुखेभ्यः प्रपितामहेभ्यस्स्वाहेति लौकिकेऽग्नौ भोजनार्थं पक्वेन हविष्येणान्नेन चरुतन्त्रेण परिचरणतन्त्रेण वा हुत्वा गन्धपुष्पधूपदीपवासोभिर्यथालाभं यथाविभवमर्चयित्वा भोजयित्वा उच्छिष्टसमीप उदगग्रेषु दर्भेषु दधिबदराक्षतमिश्रान् पिण्डान् दद्यात्, होममन्त्रैरुदगपवर्गान् । स्वाहास्थाने तृप्तिरस्त्विति विकारः । एतन्नान्दीमुखश्राद्धम् । अत्र श्लोकः—

पुंसीनामान्नचौलोपनानपाणिग्रहेषु च ।
अग्न्याधेये तथा सोमे दशस्वभ्युदयं स्मृतम् ॥ इति ।

केचिन्नान्दीमुखश्राद्धमागामिनश्राद्धस्य प्रत्यान्नायमाहुः। स्वधा ऽस्त्वीति पिण्डदाने मन्त्रान्तमाहुः । ततः पत्युर्ज्ञातयो वध्वा स्वामिनमागत्य वरणं कुर्युः—भारद्वाजगोत्राय विष्णुशर्मणे काश्यपगोत्रजां श्रीदेवीदां धर्मप्रजार्थं वृणीमह इतिवद्यथागोत्रं यथानाम वरणं कुर्युः । दास्यामीति प्रतिवचनम् । तत आप्लवनं 'काम वेद ते' इत्यादिभिर्मन्त्रैः स्वाहाकारान्तैः पिष्टसंयुक्तेनोदकेन पत्युर्ज्ञातयश्शिथिलीकृतवस्त्राया वध्वा उपस्थमाप्लावयन्ति । प्रतिमन्त्रममुमित्यत्र पतिनाम ब्रूयुः—विष्णुशर्माणमितिवत् । ततः पुण्याहवाचनम् । सर्वकर्मसु पुण्याहवाचनमादौ कर्तव्यमित्याचार्या आहुः । नान्दीमुखपुण्याहवाचने अनित्ये, आचार्येणावचनात् । करणेऽभ्युदयविशेषः । ततो वध्वास्स्वामी वामूरुमारोप्य भारद्वाजगोत्राय विष्णुशर्मणे काश्यपगोत्रजां श्रीदेवीदां तुभ्यमिमां प्रजासहत्वकर्मभ्यः प्रतिपादयामीतिवत् यथागोत्रं यथानामोक्त्वा पाणिग्राहस्य पाणावुदकं सिञ्चेत् । ततो ब्रह्मोपवेशनान्तम् ॥ ४ ॥

तत आह—

ब्राह्मणस्सहोदकुम्भः प्रावृतो वाग्यतोऽग्रेणाग्निं गत्वोदङ्मुखस्तिष्ठेत् ॥ ५ ॥

उत्तरवाससा सकर्णं प्रावृताशिरा उदकपूर्णकुम्भं शिरसा धारयन् उदक्प्रदेशात् पूर्वेणाग्निं गत्वा ब्रह्मणः पुरस्तादुदगग्रेषु दर्भेषु उदङ्मुखस्तिष्ठेत् । आ मूर्ध्न्यवसेकाद्वाग्यतः ॥ ६ ॥

स्नातामहतेनाच्छाद्य या अकृन्तन्नित्यानीयमानायां पाणिग्राहो जपेत् सोमोऽददिति॥

पाणिग्राहो वधूदेशं गत्वा पूर्वमेव सहशिरसं स्नातां वधूं नववस्त्रद्वयेन 'या अकृन्तन्, परिधत्त' इत्याभ्यां स्वयमेवाच्छाद्य पुनरग्निदेशं गत्वा प्रदात्रा तं देशं वध्वां प्राप्यमाणायां तां वीक्ष्य पतिः 'सोमोऽददत्' इति जपेत् । 'या अकृन्तन्' इत्यधरवासोदानं, 'परिधत्त' इत्युत्तरीयदानम् । ततः 'प्र मे पतियानः' इति वधूर्जपेत् । 'प्रास्याः पतियानः' इति पतिर्जपेत्, मन्त्रालिङ्गात् ॥ ६ ॥

पाणिग्राहस्य दक्षिणत उपवेशयेत् ॥ ७ ॥

सन्निधानात्सिद्धे पाणिग्राहस्येति पत्युरेवासन उपवेशनार्थम् । दर्भेषूपवेशयेत् वधूमानेता । ततः परिस्तरणादिप्रपदान्तं कृत्वा आज्यसंस्कारानन्तरमाज्यं स्रुवमिध्मं शमीपलाशमिश्रं सलाजं च शूर्पमग्नेरुत्तरतो बर्हिषि निदध्यात् । दृषत्पुत्रं चाग्नेः पश्चात् । दृषत्पुत्रोदकुम्भयोः परिषेचने बर्हिर्भावः, अहव्यत्वात् ॥ ७ ॥

प्रपदजपानन्तरमाह—

अन्वारब्धायां स्रुवेणोपघातं महाव्याहृतिभिराज्यं जुहुयात् ॥ ८ ॥

अनु साहश्ये, उपवेशनवत् । अन्वारब्धायां वध्वां दक्षिणेन पाणिना पत्यूर्दक्षिणं बाहुं, तस्य सन्निधानात्, स्पृष्टवत्यां वध्वां बर्हिषि निहितेन स्रुवेणोपहत्योपहत्य संस्कृतमाज्यं 'भूस्स्वाहा भुवस्स्वाहा स्वस्स्वाहा' इति प्रतिमन्त्रमग्नौ जुहुयात् पतिः । स्रुवस्य स्वरूपमाध्वर्यवे प्रसिद्धम् । ननु उपघातमित्यवाच्यं, अर्थसि-

द्धत्वात् । आज्यामिति चावाच्यं 'आज्यं जुहुयाद्धविषोऽनादेशे' इति वचनात् । जुहुयादिति चावाच्यं वाक्यशेषात्सिद्धेः । इदं तर्हि प्रयोजनम्—यत्रोपघातमिति वक्ष्यति, यत्राज्यं प्रधानद्रव्यं, यत्र वा मन्त्रमनुक्त्वा होमं विधास्यति तत्र तत्र व्याहृतिभिः जुहुयादिति । आज्यमेव च द्रव्यं परिभाषितत्वात् ॥ ८ ॥

समस्ताभिश्चतुर्थीम् ॥ ९ ॥

भूर्भुवस्स्वस्स्वाहेति मन्त्रः । अन्वारब्धायामिति वर्तते । अयं होमो नोपघातादिसूचितेष्वास्ति, समस्ताभिश्चेति सिद्धे चतुर्थीमिति त्र्यक्षरनिर्देशात् । त्रिष्वपि विवाहहोमेषु 'चतुर्थी स्यात्' इति अधिकवचनात् चतुर्थी चतुर्थी जुहुयादिति वीप्सार्थो गम्यते नातिप्रसङ्गः । सन्निधिविशेषाच्च तद्वीप्सासिद्धिः ॥ ९ ॥

एवं चौलोपनयनगोदानेषु ॥ १० ॥

चतुर्थीमात्रातिदेशः । ननु गोदानग्रहणमनर्थकं 'गोदाने चौलवत् कल्पः' इत्यनेनैव सिद्धत्वात् । न, तत्र केशक्लृप्तिमात्रस्यातिदेशात् ॥ १० ॥

अग्निरेतु प्रथम इति षड्भिश्च पाणिग्रहणे ॥ ११

चशब्दोऽन्वारम्भानुकर्षणार्थः ॥ ११ ॥

नाज्यभागौ न स्विष्टकृदाज्याहुतिष्वनादेशे ॥

उपघातादिशब्दसूचितास्वाज्याहुतिषु सतीष्वाज्यभागौ स्विष्टकृच्च न स्युः । नाज्यभागस्विष्टकृत इति वक्तव्ये पृथग्ग्रहणं

यत्र न स्विष्टकृत् तत्राज्यभागौ न स्तः इत्येवमर्थं, यथा वास्तुहोमे। सौविष्टकृतीमष्टम्योति पशावादेशात्तत्र प्रतिषेधाभावार्थमनादेशे इत्युक्तम्॥ १२॥

सर्वत्रोपरिष्टान्महाव्याहृतिभिः॥ १३॥

सर्वत्रेति व्याप्त्यर्थम्। प्रतिकर्म विशेषविहितं कृत्वा भूस्स्वाहा भूवस्स्वाहा स्वस्स्वाहेत्याज्यं जुहुयात्। प्रपदान्तवत्स्वेव प्रयुक्ताज्यलाभात् नात्रान्वारम्भः॥ १३॥

प्राजापत्यया च॥ १४॥

'प्रजापते न त्वदेतानि' इति प्राजापत्यया। चशब्दस्सर्वत्रोपरिष्टादित्यस्यानुकर्षणार्थः॥ १४॥

प्रायश्चित्तं जुहुयात्॥ १५॥

प्राजापत्ययेति वर्तते। यत्रान्तरितविपर्यासादौ प्रायश्चित्तापेक्षा तत्र प्राजापत्यया स्रुवेणाज्यं जुहुयात् सन्धानार्थमिति सूत्रार्थः। अन्तरिते अन्तरितं कृत्वा प्रायश्चित्तम्। सन्निपत्योपकारकाङ्गान्तराये उपकार्ये निवृत्तप्रयोजने प्रायश्चित्तमेव, नान्तरितस्य पुनःकरणम्। पदार्थविपर्यासे प्रायश्चित्तमेव न क्रमार्थं पुनरावृत्तिः। आज्यसंस्कारात्पूर्वं चेन्निमित्तं स्यात् संस्कृते आज्ये प्रायश्चित्तं कुर्यात्। उत्तरकाले चेन्निमित्तं परिज्ञानानन्तरमेव। वाक्यशेषात्सिद्धे जुहुयादिति अग्न्यनुगतावप्येतदेव प्रायश्चित्तमित्येवमर्थम्। इतरथा प्रकृतत्वात् प्रपदान्तवत्सु कर्मस्वेव स्यात्। बाहिस्तन्त्रे तु आज्यतन्त्रेण परिचरणतन्त्रेण वा प्रायश्चित्तहोमः। तन्त्रमध्ये तु तत्तत्तन्त्रमेवोपजीवति॥

मन्त्रलिङ्गादपि सर्वत्र प्रायश्चित्तार्थता गम्यत एव । अयं मन्त्रार्थः—हे प्रजापते ! यान्येतानि निमित्तानि प्रजातानि तानि त्वत्तोऽन्यो न कश्चिदपि प्रतिसमाधाने परि ता बभूव न पदार्थीकर्तुं समर्थः। अतो यत्समाधानकामा वयं तुभ्यं जुहुमः तदस्माकमस्तु। तत्समाधानाच्च रयीणां धनतुल्यानां च पुरुषार्थानां वयं स्वामिनः भूयास्मेति । स्वद्रव्यत्यागलक्षणानां कर्मणां कालात्यये 'यत्कुसीदम्' इति होमः प्रायश्चित्तं मन्त्रलिङ्गात् । प्रपदान्तवत्कर्मलोपे आज्यतन्त्रं, इतरत्र परिचरणतन्त्रम् । अयं मन्त्रार्थः—यत्कुसीदं ऋणतुल्यमवश्यं प्रदेयमप्रदत्तं मया इह जन्मनि येन अप्रदत्तेन निधिना निधितुल्येन यमस्य सदने यथेष्टं चरामि तत्प्रदेयमिदमेवाज्यं तत्कार्यकरं हे अग्ने! जीवन्नेवाहं तुभ्यं तत्प्रति तत्प्रदेयं प्रति तत्समाधानाय ददामीत्यर्थः । सर्वत्राङ्गभ्रंषे प्रयोगसमाप्त्युत्तरकालं यदि स्मरेत् तत्र न पुनः करणं नापि प्रायश्चित्तं प्रधानसम्बन्धायोगात्, विगुणमेव तदस्तु। प्रधानभ्रंषे तु साङ्गस्य पुनरावृत्तिः । बहुप्रधानके तु भ्रष्टस्यैव प्रधानस्य साङ्गस्य पुनरावृत्तिः नाभ्रष्टस्य । एवमकरणे शाट्यायनिप्रोक्तं प्रायश्चित्तं प्राजापत्यया यत्कुसीदमित्यनेन सर्वत्र विकल्पते । पूर्ववत्तन्त्रनियमः ।

अनुगतेऽग्नावग्न्यन्तरसंसर्गे रजस्वलाऽभिगमने दिवामैथुने कुमारस्य संस्काराकरणे मेखलाऽधारणे सन्ध्यादिलोपे च शाट्यायनिप्रोक्तं प्रायश्चित्तं स्यात् । अनुगतादौ दोषलघुत्वगुरुत्वापेक्षया तन्त्रनियमः, यथाऽल्पकालविच्छेदे परिचरणतन्त्रं बहुकालाविच्छेदे आज्यतन्त्रमिति ॥ भूस्स्वाहा । भुवस्स्वाहा । स्वस्स्वाहा । पाहि नो अग्न एनसे स्वाहा । पाहि नो

विश्ववेदसे स्वाहा। यज्ञं पाहि विभावसो स्वाहा। सर्वं पाहि शतक्रतो स्वाहा। पाहि नो अग्न एकया। पाह्युत द्वितीयया। पाहि गीर्भिस्तिसृभिरूर्जां पते। पाहि चतसृभिर्वसो स्वाहा। पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा। पुनर्नः पाह्यंहसस्स्वाहा। सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्नया विश्वतस्परि स्वाहा। पुनश्च व्याहृतिभिराज्यं जुहुयात् इति शाट्यायनिविधानम्॥

पुनराधाननिमित्ते तु पुनराधानमेव कुर्यात्। अग्नेर्द्वादशाहविच्छेदः, अग्नेः स्वेच्छया त्यागः, जायाभर्त्रोः प्रवासः, श्वकाकचण्डालरजस्वलादिस्पर्शः, समारोपितसमिन्नाश इत्येतानि पुनराधाननिमित्तानि। तस्य विधिः—दिवा हविष्यमन्नमेकभक्तं भुक्त्वा ब्रह्मचारिव्रतः अपरेद्युरुपवासं कुर्वन् 'तपश्च तेजश्च' इत्यादि 'ब्रह्मणः पुत्राय नमः' इत्येवमन्तं शतकृत्वोऽष्टकृत्वश्चारण्ये जपित्वा 'देवकृतस्य' इत्यादि 'अप्सु धौतस्य' इत्यतः प्राक् तथा जपेत्। ततः श्वोभूते 'पुनर्मा' इत्येताभ्यां जलमवगाह्य ब्राह्मणस्यानूचानस्याग्निमतो गृहात्तदलाभे यथासम्भवं श्रौतस्मार्तपरस्य गृहादग्निमाहृत्य प्रपदान्तं कृत्वा व्याहृतिभिर्हुत्वा भूस्स्वाहेति त्रिर्जुहुयात्। ततो भुवस्स्वाहेति त्रिः। ततः स्वस्स्वाहेति त्रिः। ततश्च प्रतिमन्त्रं द्वादशकृत्वः। ततश्च प्रतिमन्त्रं त्रिष्कृत्वः। तत उत्थाय नमस्काराञ्जलिं कृत्वा 'अग्निं दूतं, अग्निर्मूर्धा, अग्निस्तिग्मेन, अग्ने रक्षाणः' इति चतुर्ऋचं जपेत्। अथोपविश्य 'अग्न आयाहि वीतये, अग्निं वो वृधन्तं, नमस्ते अग्न ओजसे, उप त्वाऽग्ने दिवेदिवे' इति चतसृभिराज्यं जुहुयात्। सोमं राजानं सैविष्टकृतं च। तत उपरिष्टाद्धोमादि। नात्र बध्वाऽन्वारम्भः,

अग्निसंस्कार[1]त्वात् । सर्वेषां प्रपदान्तानामन्ते वामदेव्यगानम् तद्गजपश्च । सायंप्रातर्होमानामन्ते यथासङ्ख्यं गौषूक्ताश्वसूक्तगानम् । अग्निधारणासम्भवे 'अयं ते योनिः' इति समित्समारोपणं 'या ते अग्ने' इत्यात्मसमारोपणं वा । उभयत्र लौकिकाग्नौ 'उपावरोह' इत्यवरोहणम् । इदं सर्वं पुनराधानविधावुक्तम् ।

दिवा हविष्यभोजनादि देवकृतजपान्तं स्मृत्युक्ताभ्यां कृच्छ्रचान्द्रायणाभ्यां विकल्पते । एवं विनिवेशः—अकामकृते निमित्ते सन्धानसम्भवे सत्यनुपेक्षायामिदं, उपेक्षायां तु कृच्छ्रः । कामकृते चान्द्रायणम् । अत्रापरं मतं—कृच्छ्रचान्द्रायणे त्रेताग्निविषये एव । गृह्याग्निनाशे पुनराधानविध्युक्तमेवेति । गृह्याग्नेर्द्वादशाहविच्छेदे पुनराधानमित्युक्तम् । पुनराधानविधावत्रैव गृह्यसङ्ग्रहोपदेशः—

विच्छिन्नेऽनुगते सद्यः प्राजापत्यान्तपञ्चकम् ।
द्वादशाहातिपत्तौ चेत् इध्मपाहिप्रकीर्तितः ॥
प्राक्तदश्शुद्धपाहि स्यात् अर्वाङ्मासात्परं न तु ।
मासादूर्ध्वं यथाशास्त्रं पुनराधानमिष्यते ॥

अस्यार्थः—गृह्याग्न्यनुगतौ मासादूर्ध्वं पुनराधानं, ततः प्राक् द्वादशाहादूर्ध्वं आज्यतन्त्रेण पाहित्रयोदशहोमः । ततः प्राक् स एव परिचरणतन्त्रेणेति । आज्यतन्त्राणां प्रकृतिर्विवाहः । परिचरणतन्त्राणां औपासनहोमः । चरुतन्त्राणां दर्शपूर्णमासौ । पशुतन्त्राणां अष्टकापशुः । आज्यतन्त्रे वरणस्याप्रवृत्तिः तस्य प्रदानार्थत्वात् । अर्थलोपात् आप्लवनस्यापि 'समानयामुम्'

[1] अतत्संस्कार, ग. पाठः.

इति मन्त्रलिङ्गात् भर्तृसम्बन्धार्थत्वादप्रवृत्तिः । लेखाचतुर्थीहोमयोरपि न पुनराप्लवनम् । कृतस्यैव सकलविवाहशेषत्वात् । होमत्रयात्मको विवाहः । वरणवदुदकसेचनम् । उदकुम्भस्य मूर्ध्न्यवसेकार्थत्वादप्रवृत्तिः 'स्नातामहतेनाच्छाद्य' इत्यस्य । पुंसवनादौ पुनः प्रतिप्रसवादप्रवृत्तिः । 'सोमोऽददत्' इत्यस्य च वधूदानप्रकाशनार्थत्वात् 'प्रमे पतियान' इत्यस्य च भर्तृसम्बन्धार्थमार्गक्लृप्तिपरत्वादप्रवृत्तिः । लेखाचतुर्थीहोमयोरपि न पुनः क्रिया होमत्रयात्मकस्य मार्गस्यैकत्वात् । दृषत्पुत्रस्य चाक्रमणार्थत्वादप्रवृत्तिः । शूर्पलाजानां च लाजहोमार्थत्वान्न निधानम् । आज्यतन्त्रेष्वन्वारम्भस्तु संस्कारकर्मसु संस्कार्येण कर्तव्य एव संस्कारार्थत्वात् नान्येषु । होमानामप्रवृत्तिः उपरिष्टाद्धोमान् वर्जयित्वा प्रधानत्वात् । भवतु वा व्याहृतिहोमानामङ्गत्व तथाऽपि दर्शपूर्णमासयोरप्येतत्प्रकृतित्वात् सर्वेषु प्राप्तानामुपघातादिसूचनम् । 'एवं चौलोपनयनगोदानेषु' इति च नियमार्थं भविष्यति । 'प्रयोगमध्ये नाज्यभागौ' इत्यादेस्सर्वार्थस्य विधानस्यैतत्प्रयोजनम् , कथं नामैतत् प्रागुक्तानामेवेतिकर्तव्यतात्वेन प्रदेशान्तरे प्रवृत्तिः न परस्तावद्वक्ष्यमाणानां 'हुत्वोपोत्तिष्ठते' इत्येवमादीनामपि । प्रकृतमनुसरामः ॥ १५ ॥

हुत्वोपोत्तिष्ठतः ॥ १६ ॥

व्याहृतिभिर्हुत्वा उपश्लिष्टौ जायापती सहोत्तिष्ठतो वध्वा दक्षिणं पाणिं दाक्षिणेन पाणिना गृह्णन् पतिरुत्तिष्ठेत् तस्याः अस्खातन्त्र्यात् । हुत्वेति समानकर्तृकत्वं होमेऽप्युपश्लेषार्थम् । अतोऽन्वारब्धायामेव होमः । न च पूर्ववदत्रान्वारम्भः पतिपाणेर्होमे व्यापृतत्वात् ॥ १६ ॥

अनुपृष्ठं गत्वा दक्षिणतोऽवस्थाय वध्वञ्जलिं गृह्णीयात् ॥ १७ ॥

अनु सादृश्ये । उत्थानवत्पाणिं गृह्णन्नेव तस्याः पृष्ठदेशेन गत्वा दक्षिणतो दर्भेषु स्थित्वा तस्याः आकोशमञ्जलिमुभाभ्यां हस्ताभ्यामुपादद्यात् स्वीकुर्यात् ॥ १७ ॥

पूर्वा माता शमीपलाशमिश्रान् लाजाञ्छूर्पे कृत्वा ॥ १८ ॥

पश्चादुद्वाहवचनात्, वधूगृहं गत्वा विवाह इति वधूमातुस्सन्निधानात्, सा पूर्वमेव लाजान् स्वयमुत्पाद्य शम्या पलाशेन वा संसृष्टान् शमीपर्णमिश्रान् वा तान् बर्हिषि शूर्पे निधाय तिष्ठति । तदानीं शूर्पेणादायाग्नेः पुरस्ताद्धूमाता तिष्ठेत् । एवं सूत्रयोजना—लाजान् कृत्वा शूर्पे निहिताञ्छमीपलाशमिश्रानादाय पूर्वा पूर्वदिक्सम्बन्धिनी वधूमाता तिष्ठेदिति ॥ १८ ॥

पश्चादग्नेर्दृषत्पुत्रमाक्रमयेद्वधूं दक्षिणेन प्रपदेन इममश्मानमिति ॥ १९ ॥

पश्चादग्नेः स्थितं तं दृषत्पुत्रं सव्येन पाणिना अञ्जलिं गृह्णन्नेव दक्षिणेन पाणिना दक्षिणमूरुं गृहीत्वोत्क्षिप्याङ्गालि[1]मूलेन स्वयं मन्त्रमुक्त्वाऽऽक्रमयेत् । सन्निधानात्सिद्धे दाक्षिणेनेति प्रागुदीचीमुत्क्रमयेदित्यत्रापि दाक्षिणनियमार्थम् ॥ १९ ॥

[1] अङ्गलि.

सकृद्गृहीतमञ्जलिं लाजानां वध्वञ्जलावा-
वपेत् भ्राता ॥ २० ॥

वधूभ्राता, वध्वञ्जलाविति वध्वास्सन्निधानात् । शमीपलाशमिश्राणामञ्जलिम् ॥ २० ॥

सुहृद्वा कश्चित् ॥ २१ ॥

भ्रातुरलाभे वध्वा हितैषी कश्चित्पुरुषः आवपेत् । सुहृद्वेति सिद्धे कश्चिदिति पुरूषनियमार्थम् ॥ २१ ॥

तं साऽग्नौ जुहुयादविच्छिद्याञ्जलिं इयं ना-
रीति ॥ २२ ॥

प्रकृतत्वात्सिद्धे तामेति तमेव लाजाञ्जलिं जुहुयात् उपस्तरणाभिधारणे न कुर्यादित्येवमर्थं, अन्यथा हि होमद्रव्ये दर्शनात् शङ्का स्यात् । सेति सा वधूः जुहुयादेव न मन्त्रं ब्रूयात् पतिरेव मन्त्रं ब्रूयादित्येवमर्थम् । अग्नाविति प्रभूतेऽग्नाविल्येवमर्थम्। पाण्योरविच्छेदं कुर्वती वधूरङ्गुल्यग्रेण जुहुयात् । दक्षत्पुत्राक्रमणादूर्ध्वमञ्जलिं गृह्णीयादेव पतिः ॥ २२ ॥

अर्यमणं पूषणमित्युत्तरयोः ॥ २३ ॥

उत्तरयोर्लाजहोमयोरिमौ मन्त्रौ ॥ २३ ॥

हुते तेनैव गत्वा प्रदक्षिणमग्निं परिणयेत्
कन्यला पितृभ्य इति ॥ २४ ॥

इयं नारीति हुते येनैव प्रकारेण दक्षिणतो गतस्तेनैव प्रकारेण पाणिं गृह्णन्ननुपृष्ठमुत्तरतो गत्वा पाणिं गृह्णन्नेव अग्निं प्रदक्षिणीकुर्वन् वधूमनुगमयेत्। आज्यस्रुवशूर्पदृषत्पुत्राणां प्रदक्षिणेऽन्तर्भावः। मातृब्रह्मोदकुम्भकानां* बहिर्भावः। पतिर्मन्त्रं ब्रूयात् ॥ २४ ॥

अवस्थानप्रभृत्येवं त्रिः ॥ २५ ॥

मध्यमायामावृत्तौ अर्यमणमिति लाजहोममन्त्रः। उत्तमायां पूषणमिति। इतरत्समानम् ॥ २५ ॥

शूर्पेण शिष्टानग्नावोप्य प्रागुदीचीमुत्क्रमयेत् एकमिष इति ॥ २६ ॥

प्रकृतत्वात्सिद्धेऽग्नावित्यग्नौ यत्कृत्यं तत्सर्वं तत्रैव समापनीयम्। प्रागुदीचीमुत्क्रमयेदित्यस्य च गमनोपक्रमत्वात् न प्रत्यावृत्य समाप्तिरिति केचित्। तदयुक्तम्—अग्नावित्यनुक्तेऽप्यन्यत्राप्यहोमत्वाल्लाजप्रक्षेपप्रसङ्गात् 'अपरेणाग्निमौदकः' इतिवचनादन्यर्थमवश्यंभावित्वाच्च प्रत्यागमनस्य च लयपा क्रमस्य द्योतितत्वात्। उत्क्रमणं दृषत्पुत्राक्रमणवत् प्रतिमन्त्रम्। सप्त पदानि। सखी सप्तपदीति वधूमीक्षमाणो जपेत्, मन्त्रलिङ्गात् ॥ २६ ॥

ईक्षकावेक्षणरथारोहणदुर्गानुमन्त्रणान्यभिरूपाभिः ॥ २७ ॥

वधूं द्रष्टुमागताः सुमङ्गलीस्त्रियो वीक्षमाणः 'सुमङ्गलीः' इति जपेत्। 'सुकिंशुकम्' इति वधूं रथमारोहयेत्। अध्वनि

* ब्रह्मोदकुम्भयोरौदकस्य च ख. ग.

भयस्थाने 'मा विदन्' इति जपेत्। सुमङ्गलीरित्यस्यानागताभ्यां सह निर्देशः तत्साम्यार्थम्, यथा महत्यध्वनि रथारोहणबहुत्वे भयस्थानबहुत्वे च तयोरावृत्तिः दृष्टार्थत्वात् तथाऽस्यापि स्वचागमनावृत्तावाविवाहसमाप्तेरावृत्तिरिति ॥ २७ ॥

ईक्षकावेक्षणानन्तरमाह—

अपरेणाग्निमौदको गत्वा पाणिग्राहं मूर्धन्यवसिञ्चेत् ॥ २८ ॥

ब्रह्माग्न्योरन्तरेण गत्वा ॥ २८ ॥

वधूं च ॥ २९ ॥

क्रमेणावसेकः ॥ २९ ॥

समञ्जन्त्वित्यवसिक्तः ॥ ३० ॥

जपेत् पतिः ॥ ३० ॥

दक्षिणं पाणिं साङ्गुष्ठं गृह्णीयात् गृभ्णामि ते इति षड्भिः ॥ ३१ ॥

उत्तरोत्तरेण मन्त्रेणोत्तरोत्तरमभिपीडनम्। अथ प्रदक्षिणमग्निं प्रत्यागम्य उपरिष्टाद्धोमादि वामदेव्यगानान्तं कुर्यात् यथा दर्शपूर्णमासयोर्वक्ष्यते। नात्रान्वारम्भः ॥ ३१ ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ प्रथमस्य तृतीयः खण्डः.

प्रागुदीचीमुद्वहेत् ॥ १ ॥

होमानन्तरमेव प्रागुदीचीं दिशं वधूमग्निं च प्रापयेत्पतिः॥

ब्राह्मणकुलेऽग्निमुपसमाधाय पश्चादग्नेर्लोहितं चर्मानड्वहमुत्तरलोम प्राग्ग्रीवमास्तीर्य वाग्यतामुपवेशयेत् ॥ २ ॥

विवाहगृहे गृहान्तरे वा । यदि क्षत्रियादिगृहे विवाहः तदा त्वन्यस्मिन्नेव ब्राह्मणकुले अग्न्युपसमाधानान्तं कृत्वा चर्मणि वधूमुपवेशयेत् पतिरस्तमयकाले । नात्र वध्वा दर्भासनं तत्कार्यकरणत्वाच्चर्मणः ॥ २ ॥

प्रोक्ते नक्षत्रेऽन्वारब्धायां स्रुवेणोपघातं जुहुयात् षड्भिर्लेखाप्रभृतिभिस्सम्पातानवनयन् मूर्धनि वध्वाः ॥ ३ ॥

अन्येनोदितानि नक्षत्राणीत्युक्ते । अत एवोपर्याच्छादिते देशे होमः । प्रशब्दः प्रथमोदयार्थः । परिसमूहनादीनि कृत्वा व्याहृतिभिस्समस्ताभिश्च हुत्वा लेखादिभिस्स्वाहाकारान्तैर्जुहुयात् । प्रकृतितस्सिद्धे अन्वारब्धायामित्येतत् प्रकृतिसादृश्यार्थत्वात् उपवेशनवत् पत्युरेवालम्भ(१)प्रयोक्तृत्वार्थम् । इतरथा पित्रादेस्स्यात् । स्रुवेणेति स्रुवेण सम्पातावनयनार्थं, इतरथा दक्षिणेन पाणिना स्यात् । उपघातमिति प्रत्युपघातं व्याहृतिहोमेष्वपि सम्पातावनयनार्थम् । उपघातमित्याभीक्ष्ण्ये णमुल् । एतत्त्रितयमपि

[1] वान्वारंभ.

न्यायसूचनपरमेव । तथाहि—आद्ये होमे न पितृत्वमन्वारम्भप्रयोक्तृत्वे कारणं, किं तर्हि ? तस्याः पित्रधीनता । 'बाल्ये पितृवशे तिष्ठेत्' इति वचनात् पित्रधीनत्वम् । सा त्विदानीं भर्त्रधीना 'पाणिग्राहस्य यौवने' इति वचनात् । न्यायपरत्वात् सूत्रस्य, न्यायस्य च तुल्यत्वात् । चतुर्थीहोमेऽपि भर्तुरेव प्रयोक्तृत्वम् । उपनयनादिषु चाचार्यस्य । सम्पातानामपि स्रुवगतत्वेन साधनान्तरप्रयुक्तिक्षयात्तेनैवावनयनम् । अत एव चतुर्थीहोमेऽपि तथैव । तथा दशानां होमानां संस्कारार्थत्वात् संस्कारस्य सम्पातावनयनद्वारत्वात् दशस्वप्यवनयनम् । अत एव चतुर्थीहोमेऽपि नवस्वाप्लवनद्वारत्वात् हुत्वा हुत्वा सम्पातावनयनं, होमावशिष्टे संपातप्रसिद्धेः ॥ ३ ॥

प्रदक्षिणमग्निं परिक्रम्य ध्रुवं दर्शयति ध्रुवा द्यौरिति ॥ ४ ॥

पत्युर्मन्त्रः ॥ ४ ॥

अभिवाद्य गुरून् गोत्रेण विसृजेद्वाचम् ॥ ५ ॥

काश्यपगोत्राऽहमभिवादये इतिवत् स्वगोत्रमुक्त्वाऽभिवाद्य वधूर्वाङ्नियमं त्यजेत् । नावश्यं वदेत् । अथोपरिष्टाद्धोमादि वामदेव्यगानान्तं कुर्यात् ॥ ५ ॥

तत आह

गौर्दक्षिणा ॥ ६ ॥

होमत्रयार्थमस्मिन् काले ब्रह्मणे देया । अत एव त्रिष्वपि होमेषु एक एव ब्रह्मा ॥ ६ ॥

अत्राघ्र्यम् ॥ ७ ॥

अस्मिन् काले विवाहकर्त्रे तज्ज्ञातिभ्यश्च वध्वाः प्रदाताऽर्घ्यं दद्यात् । तस्य विधिर्मन्त्रक्रमानुसारेण, मधुपर्कं प्रतिग्रहीष्यन् इत्यारभ्य वक्ष्यते ॥ ७ ॥

आगतेष्वित्येके ॥ ८ ॥

यदा विवाहार्थं वध्वा गृहमागताः तदेत्यर्थः ॥ ८ ॥

त्रिरात्रं क्षारलवणे दुग्धमिति वर्जयानौ सह शय्यातां ब्रह्मचारिणौ ॥ ९ ॥

होमादूर्ध्वं नियमः तद्दिनप्रभृति त्रिरात्रम् । दुग्धमुद्धृतसारं पिण्याकादि । सह एकस्यां शय्यायां रात्रेषु शयीयातां ब्रह्मचारिणौ निवृत्तमैथुनौ परस्परमन्यतश्च । इतिशब्दोऽन्यस्यापि व्रतविरोधिनो वर्जनार्थः ॥ ९ ॥

हविष्यमन्नं परिजप्यान्नपाशेनेत्यसाविति वध्वा नाम ब्रूयात् ॥ १० ॥

त्रिरात्रं भोजनकालेष्वाहृतमन्नमभिमृशन् जपित्वा ॥१०

भुक्त्वोच्छिष्टं वध्वै दद्यात् ॥ ११ ॥

सा चाश्नीयात् । लेखाहोमं समाप्य वधूं, 'सुकिंशुकम्' इति रथमारोप्य अग्निं च गृहीत्वा भयस्थाने 'मा विदन्' इति जपित्वा स्वगृहं प्रविश्य 'इह गावः' इति जपित्वा शय्यायामुपविश्य

वधूमीक्षमाणः 'इह धृतिः' इति जपेत् मन्त्रलिङ्गात्। तत्र त्रिरात्रं सह शयीयाताम् ॥ ११ ॥

तत आह—

ऊर्ध्वं त्रिरात्राज्ज्यतसृभिराज्यं जुहुयात् अग्ने प्रायश्चित्तिरिति समस्य पञ्चमीं सम्पातानवनयन्नुदपात्रे ॥ १२ ॥

चतुर्थेऽहनि पूर्वाह्णे प्रपदान्तं कृत्वाऽन्वारब्धायां महाव्याहृतिभिः समस्तान्ताभिर्हुत्वा 'अग्ने प्रायश्चित्तिः' इत्यादिभिः स्वाहाकारान्तैर्जुहुयात् । नव सम्पाताः । महत्यध्वन्यर्थादुत्कर्षः सहशयनस्य । हविष्यमन्नमित्यस्य प्रकृतत्वात्तद्व्युदासार्थमाज्यमित्युक्तम् । उदकपूर्णं पात्रं स्नानाय पर्याप्तं स्यात् ॥ १२ ॥

तेनैनां सकेशनखामाप्लावयेत् ॥ १३ ॥

सहशिरसं पतिस्स्वयमेव स्नापयेत् । ततो वामदेव्यगानान्तं कृत्वा ब्राह्मणान् भोजयेत् ॥ १३ ॥

ततो यथार्थं स्यात् ॥ १४ ॥

न प्रतिहोमं साध्यभेदायत्तं(१)याथार्थ्यं, किन्त्वेकसाध्यमेवेदं होमत्रयात्मकमनुष्ठानमित्येवमर्थम् ॥ १४ ॥

ऋतुकाले दक्षिणेन पाणिनोपस्थमालभेद्विष्णुर्योनिं कल्पयत्विति समाप्तायाम् ॥ १५ ॥

[1] भेदायेदं. ख. ग. ; साध्यभेदमादाय थाथार्थ्यं—घ.

'दायादिरग्निः' इत्यस्यापि पक्षस्याभ्युपगमं दर्शयितुमौपासनहोममनुक्त्वेदमुक्तम् ॥ रजोदर्शनप्रभृति षोडशरात्रं ऋतुकालः। यदि राज्यास्तृतीये भागे रजस्स्यात् तदोत्तरमेवाहार्विद्यात् चतुर्थे भाग इति केचित् । समाप्तायामिति सम्यगवस्थायां प्राप्तायां वध्वामित्यर्थः । काऽसाववस्था ।

तासामाद्याश्चतस्रस्तु निन्द्या एकादशी च या ।
त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः ॥
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ॥

एवमादिसूचिता ॥ १५ ॥

सम्भवेद्गर्भं धेहीति ॥ १६ ॥

सम्यगालोच्य मुहूर्तादि मिथुनीभवेत् ॥ १६ ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यसूत्रवृत्तौ प्रथमस्य चतुर्थः खण्डः

यस्मिन्नग्नौ पाणिं गृह्णीयात्स गृह्यः ॥ १ ॥

पाणिं गृह्णीयादिति विवाहकरणं लक्ष्यते । व्यवहारार्था हि संज्ञा । एवं चेद्विवाहादनु निष्पादितत्वात् गृह्यत्वस्य विवाहावस्थायां गृह्यत्वाभावात् ब्रह्मा न स्यात् । न, 'गौर्दक्षिणा' इति लिङ्गात् ॥ १ ॥

यस्मिन्वाऽन्त्यां समिधमादध्यात् ॥ २ ॥

यस्मिन्नग्नौ ब्रह्मचार्यन्त्यां समिधमादध्यात् स वा गृह्यः । अस्मिन्पक्षे तु तत्प्रभृति सायंप्रातर्होमादीनि स्युः । गृह्य एव च विवाहः ॥ २ ॥

निर्मन्थ्यो वा पुण्यस्सोऽनर्धुकः ॥ ३ ॥

उक्तस्यैव प्रकारद्वयस्योत्पत्तिनियमोऽयं, न गृह्यान्तरम् । वाशब्दश्शास्त्रान्तरोक्तस्यापि श्रोत्रियागारादेस्संग्रहणार्थः । पुण्यः परलोकहितकरः । अनर्धुकः इह जन्मनि ऋद्ध्यभावकरः ॥ ३ ॥

अम्बरीषाद्वाऽऽनयेत् ॥ ४ ॥

अपूपविक्रयार्थादग्नेर्वा ॥ ४ ॥

बहुयाजिनो वाऽगाराच्छूद्रवर्जम् ॥ ५ ॥

बहुदेवपूजकस्य बहुदातुर्वा गृहादानयेदग्निं विवाहं कर्तुमन्त्यां समिधं वाऽऽधातुम् ॥ ५ ॥

सायमाहुत्युपक्रमं परिचरणम् ॥ ६ ॥

चतुर्थीहोमानन्तरं यस्सायंकालः तमारभ्याजीवनपरिसमाप्तेः आऽऽश्रमपरिसमाप्तेः आऽऽधानकालाद्वा चरणं अनुष्ठानं कुर्यात् । परीत्यधिकारैक्यं सूचितम् । अतो नान्तरा ब्राह्मणभोजनम् । अन्त्यां समिधं, दायादिर्वा इत्यनयोरपि पक्षयोस्सायमाहुत्युपक्रममेव ॥ ६ ॥

प्रागस्तमयोदयाभ्यां प्रादुष्कृत्य ॥ ७ ॥

प्रज्वाल्य समीपकाले ॥ ७ ॥

अस्तमिते होमः ॥ ८ ॥

अस्तमयानन्तरमेव ॥ ८ ॥

उदिते चानुदिते वा ॥ ९ ॥

सन्ध्यायामेव ॥ ९ ॥

हविष्यस्यान्नस्याकृतं चेत् प्रक्षाल्य जुहुयात्पाणिना ॥ १० ॥

हविष्यस्यान्नस्य माषवरकादिद्रव्यव्यतिरिक्तस्य लवणाद्यसंयुक्तस्य येषुकेषुचिद्धोमेषु साधनतया श्रुतस्यौदनस्य षष्ठीनिर्देशात्तदेकदेशस्य साधनतयोपादानम् । न पक्वावस्थस्य कृत्स्नस्योपादानम् । अतः पाकधर्मा न स्युः । इतरथा शङ्का स्यात्, दर्शपूर्णमासादौ दर्शनात् । अकृतं अपक्वं उक्तजातीयानेव तण्डुलांस्त्रिः प्रक्षाळ्याङ्गुष्ठपर्वमात्रप्रमाणामाहुतिं जुहुयात् । होमसामान्यात् स्रुवस्य प्राप्तौ पाणेर्विधानम् ॥ १० ॥

दधि चेत्पयो वा कंसेन ॥ ११ ॥

चेदिति सिद्धवद्व्यपदेशः शास्त्रान्तरविहितस्यापि द्रव्यस्य सङ्ग्रहणार्थः । अत आज्यमपि द्रव्यम् । पृथग्ग्रहणमितरेतरसंयोगव्युदासार्थम् ॥ ११ ॥

चरुस्थाल्या वा ॥ १२ ॥

कंसेन विकल्पः ॥ १२ ॥

अग्नये स्वाहेति मध्ये ॥ १३ ॥

अग्निमध्ये सायंकाले ॥ १३ ॥

तूष्णीं प्रागुदीचीमुत्तराम् ॥ १४ ॥

मन्त्रमनुच्चारयन्नावेव प्रागुदीच्यां दिशि द्वितीयां जुहुयात्। सायंप्रातर्होमस्य देवतासाध्यत्वात् यथाकथाचित्प्राप्तौ तूष्णींधर्मस्य प्रजापतावसाधारण्यात् प्रजापतये स्वाहेति मनसा स्मरन् जुहुयात्। 'तस्मात्प्राजापत्यां मनसा जुह्वति' इति श्रुतेः। तूष्णींधर्मत्वं प्रजापतेरेव। या प्रागुदीची आहुतिर्दर्शपूर्णमासयोः 'अग्नये स्विष्टकृते स्वाहा' इति तामत्र जुहुयादिति केचित्। तदयुक्तम्—वक्ष्यमाणस्य सिद्धवद्व्यपदेशायोगात्, असाधारणशब्दाभावाच्च। पश्चाद्विधानादेवोत्तरत्वे सिद्धे उत्तरामिति यत्र यत्रैकाहुतिश्चोद्यते तत्र तत्रैवोत्तरा स्यादित्येवमर्थम् ॥ १४ ॥

सूर्यायेति प्रातः पूर्वाम् ॥ १५ ॥

सूर्याय स्वाहेत्यग्निमध्ये ॥ १५ ॥

नात्र परिसमूहनादीनि पर्युक्षणवर्जम् ॥ १६ ॥

बहुवचनमुपरिष्टाद्धोमानां समिदाधानादेश्च निवृत्त्यर्थम्। समन्तात् परिषेचनं, पुरस्तादुपरिष्टाच्च पर्युक्षणम्। उत्तराहुत्यनन्तरमुभयत्र समिधमादध्यादित्युपदेशः। पूर्वाहुतेः पूर्वमिति केचित् ॥ १६ ॥

पत्नी जुहुयादित्येके ॥ १७ ॥

गृहाः पत्नी गृह्योऽग्नेरेष इति ॥ १८ ॥

स्पष्टे ॥ १७–१८ ॥

सिद्धे सायंप्रातर्भूतमित्युक्त ओमित्युच्चैर्ब्रूयात् ॥

भोजनार्थमोदने सिद्धे भोजनकालस्य परतन्त्रत्वान्न पूर्वाह्णनियमः, कालस्योपलक्षणत्वाच्च । असत्यपि भोजनार्थे पाके पाकं कृत्वा भवत्येव तस्मिन् काले होमः । सायंप्रातरिति रात्रावहनि चेत्यर्थः । प्रकृतितस्सिद्धे वचनं परिचरणतन्त्रेषु कालप्राप्तिर्नास्तीति द्योतनार्थम् । पचनकर्त्रा भूतमित्युक्ते गृहपतिरोमिति ब्रूयात् ॥ १९ ॥

माक्षा नमस्त इत्युपांशु ॥ २० ॥

ब्रूयादित्यनुवर्तते ॥ २० ॥

हविष्यस्यान्नस्य जुहुयात् प्राजापत्यं सौविष्टकृतं च ॥ २१ ॥

परिचरणतन्त्रेण । प्रकृतितस्सिद्धे हविष्यस्येति अहविष्यभोजने भोज्यसंस्कारप्रयुक्तभ्रान्त्या तेनापि होम आशङ्क्येतेति तन्निवृत्त्यर्थम् । प्रजापतये स्वाहेति मनसाऽग्निमध्ये, अग्नये स्विष्टकृते स्वाहेति प्रागुदोच्यां जुहुयात् ॥ २१ ॥

बलीन्नयेत् ॥ २२ ॥

वक्ष्यमाणेषु देशेषु निदध्यात् ॥ २२ ॥

बहिरन्तर्वा चतुर्निधाय ॥ २३ ॥

गृह एव गर्भगृहात् बहिरन्तर्गृहे वा । चतुरिति ग्रहणात् बलिचतुष्टयार्थमादावन्ते च सकृदेव परिषेचनम् । प्रत्येकमिति केचित् ॥ २३ ॥

मणिकदेशे ॥ २४ ॥

उदकधारणसमीपे ॥ २४ ॥

मध्ये ॥ २५ ॥

गर्भगृहमध्ये ॥ २५ ॥

द्वारि ॥ २६ ॥

गर्भगृहस्यैव ॥ २६ ॥

शय्यामनु ॥ २७ ॥

शयनदेशसमीपे ॥ २७ ॥

वर्च्चे वा ॥ २८ ॥

अन्वित्यनुवर्तते । अनुवर्च्चे अवस्करदेशसमीपे । [1]वाशब्दो विनिवेशार्थः, शय्यामनु नक्तम्, वर्च्चमनु दिवा देशोचित्यादेवतौचित्याच्च ॥ २८ ॥

अथ सस्तूपम् ॥ २९ ॥

अन्वित्यनुवर्तते । अथेति वक्ष्यमाणानां सर्वेषां बलीनामेष एव देश इत्येवमर्थम् । प्रथमस्थापितः स्थूणः सस्तूपः । तमनु तत्समीपदेशे ॥ २९ ॥

एकैकमुभयतः परिषिञ्चेत् ॥ ३० ॥

आदौ बलेरभावात् परिषेकशब्दानन्वयादद्भिस्सेचनमात्रम् । सिक्ते वर्हिषि निधाय प्रागुपक्रमं प्रदक्षिणं परिषिञ्चेत् ॥ ३० ॥

शेषमद्भिस्सार्धं दक्षिणा निनयेत् ॥ ३१ ॥

[1] ड. 'पुरीषोऽवस्करः' इत्यधिकम्.

बलिस्थाल्यां शिष्टमन्नमद्भिस्सह सस्तूपस्य दक्षिणतः प्राचीनावीती पित्र्येण तीर्थेन निनयेत् ॥ ३१ ॥

फलीकरणानामपामाचामस्वेति विश्राणिते ॥

कणानुदकमोदनावस्रंसनं च मिश्रीकृत्य विगतश्रमेऽतिथौ 'अग्रं ब्राह्मणाय दत्वा' इत्यस्यानन्तरमित्यर्थः । सस्तूपस्य प्रागुदीच्यां दिशि रौद्रत्वात् ॥ ३२ ॥

पृथिवी वायुः प्रजापतिर्विश्वे देवा आप ओषधिवनस्पतय आकाशः कामो मन्युर्वा रक्षोगणाः पितरो रुद्र इति बलिदैवतानि॥

उक्तानां बलीनां यथासङ्ख्यमेता देवताः । कामो मन्युर्वेति पूर्ववद्विनिवेशः ॥ ३३ ॥

तूष्णीं तु कुर्यात् ॥ ३४ ॥

तुशब्दोऽवधारणार्थः । बलिदैवतान्येव तूष्णीं न होम इति । होमेऽपि प्राजापत्यां मनसैव, 'तस्मात् प्राजापत्यां मनसा जुह्वति' इति श्रुतेः । कुर्यादिति मनोव्यापारमात्रार्थम् । पृथिव्यै वायवे प्रजापतये विश्वेभ्यो देवेभ्योऽद्भ्य ओषधिवनस्पतिभ्य आकाशाय कामाय मन्यवे रक्षोगणेभ्यः पितृभ्यो रुद्रायेति । चतुर्थ्यन्तं मनसास्मरन् बलिं निदध्यात् ॥ ३४ ॥

सर्वस्य त्वन्नस्यैतत्कुर्यात् ॥ ३५ ॥

सर्वस्येति शाकमांसादिपरिग्रहणार्थम् । इतरथा ओदन-

स्यैव स्यात् । प्रकृतावौपासनहोमे दर्शनात् । अन्नस्येति अद्नीयस्य । तुशब्द एवकारार्थे । भोजनार्थस्यैव न. दर्शपूर्णमासादिचरोः कृसरस्थालीपाकादेश्चेत्यर्थः । एतादिति । सकलवैश्वदेवकर्मपरामर्शार्थम्, इतरथा हि प्रकृतत्वात् बलीनामेव एष विशेषस्स्यात् । कुर्यादिति अनग्नेरपि लौकिके करणार्थम् ॥

असकृच्चेदेकस्मिन् काले सिद्धे सकृदेव कुर्यात् ॥ ३६ ॥

रात्रावन्हि वा यदि पाकावृत्तिः स्यात् तदा एकदैव कुर्यात् ॥ ३६ ॥

बहुधा चेद्यद्गृहपतेः ॥ ३७ ॥

युगपत् क्रमेण वा यदि बहवः पाकाः स्युः तदा यद्गृहपतेर्भोजनार्थं तस्यैव कुर्यात् । यदि गृहपतेरपि बहवः तदाऽप्येकस्यैव ॥ ३७ ॥

सर्वस्य त्वन्नस्याग्नौ कृत्वाऽग्रं ब्राह्मणाय दत्वा स्वयं कुर्यात् ॥ ३८ ॥

सर्वस्येति अहविष्यस्यापि परिग्रहणार्थम् । अन्नस्येति पक्वोपलक्षणार्थम्, अपक्वान्ननिवृत्तये च । अग्नाविति लौकिकाग्नयर्थम् । तुशब्दो विशेषणार्थः । न पूर्ववदेकस्यैव, किंतु सर्वेषामेव पक्वानां किंचित्किञ्चित् गृहीत्वैकीकृत्य तूष्णीं लौकिकेऽग्नौ द्वे आहुती निदध्यादित्यर्थः । भोज्यसंस्कारार्थमेतत् । अग्रं प्रथमं ब्राह्मणाय, ततो वर्णान्तरेभ्यो यथाक्रमेण, तस्योपलक्षणार्थत्वात् । प्रतिवर्णमपि श्रेयसे पूर्वं दद्यात्

अयं चार्थः—'सर्वान्वैश्वदेवान्ते भागिनः कुर्वीत' इत्येवमादीनि वाक्यान्यालोच्य न्याय्य उक्तः । अवश्यकार्यमेतद्दानं पक्वस्य यथासम्भवं भृत्यानामनुरोधेन । चतुर्थ्यैव सिद्धे दत्वेति यथासम्भवं दानमात्रे निवृत्तेऽपि स्वभोजनाभ्यनुज्ञानार्थं, नावश्यं तेषां भोजनपरिसमाप्तिः प्रतीक्षणीयेति । दत्वेति समानकर्तृकत्वं स्वभोजने नित्यसम्बन्धार्थम् । असति स्वभोजने नावश्यकार्यमेतद्दानमिति । असत्यपि स्वभोजने सर्वकालसाधारण्येन येभ्योऽवश्यं दानमुक्तं 'सान्तानिकं यक्ष्यमाणम्' इत्यादिना तेभ्यो दद्यादेव । स्वयंग्रहणमात्मन एवानन्तर्यनियमार्थं, न तु भृत्यादीनामिति । भृत्यानामागतैस्सहापि भोजनम् । तथा भार्याया अपि गर्भिण्या रोगिण्याश्च । स्वस्थायास्तु स्वभोजनानन्तरमेव । भुञ्जीतेति वाक्यशेषात् सिद्धे कुर्यादिति वचनं सत्कारमपि तेषां कुर्यादित्येवमर्थम् । स्मृत्याचारसिद्धस्य सूचनमात्रमेतत्सूत्रम् ॥ ३८ ॥

व्रीहिप्रभृत्या यवेभ्यो यवेभ्योवाऽऽव्रीहिभ्यः स्वयं हरेत् स्वयं हरेत् ॥ ३९ ॥'

सायं प्रातर्होमवर्जं स्वयं हौत्रम्, इति कर्तुरनियमे प्राप्ते व्रीहिसम्पत्तिप्रभृति यवसम्पत्तिप्रभृति वा षट्सु मासेषु स्वयं कर्तृत्वं नियम्यते । हरेदिति सहोमस्य बलेरुपलक्षणार्थम् ॥ द्विरुक्तिः पटलसमाप्तिद्योतिका ॥ ३९ ॥

इति रुद्रस्कन्दकृतायां गृह्यवृत्तौ प्रथमस्य पञ्चमः खण्डः
समाप्तश्च प्रथमपटलः.

पौर्णमासोपक्रमौ दर्शपूर्णमासौ ॥ १ ॥

नित्यप्रकरणे विधानादधिकारानुक्तेश्च सायंप्रातर्होमवत् नित्यावेतौ । तद्वदेवाधिकारैक्यं च यावज्जीवं यावदाश्रमं यावदाधानं वा । अतो नान्तरा ब्राह्मणभोजनम् । सूर्याचन्द्रमसौ यस्मिन् क्षणे सह वसतः स दर्शः । यस्मिन् क्षणे चन्द्रमाः पूर्यते सर्वाभिः कलाभिः स पूर्णमासः । तत्कालसम्बन्धौ प्रयोगौ दर्शपूर्णमासाविति लक्ष्येते । न चैकस्मिन् क्षणे, किन्त्वपराह्ण उपक्रम्यानन्तरे पूर्वाह्णे समाप्तिर्युक्तेति, तस्मान्मध्यन्दिनादूर्ध्वमागामिमध्यन्दिनाच्च पूर्वमसौ क्षणोऽस्ति, असौ कालो लक्ष्यते, अत एतत्कालवर्तिनौ प्रयोगौ कुर्यादित्यर्थः । वक्ष्यमाणसूत्रद्वयेनैव सिद्धे पौर्णमासोपक्रमाविति मध्ये मरणशङ्कायामपि दर्शनियमार्थम्, उपक्रमस्योपसंहारापेक्षत्वात् । एवं 'सायमाहुत्युपक्रमम्' इत्यत्रापि द्रष्टव्यम् । समाप्तिप्रकार उक्तो निदाने "तदप्यपरपक्षे" इत्यारभ्य । मृतेऽप्येवमेव समाप्य संस्कर्ता संस्कुर्यात् ॥ १ ॥

दर्शं चेत्पूर्वमुपपद्येत पौर्णमासेनेष्ट्वाऽथ तत्कुर्यात् ॥ २ ॥

चतुर्थीहोमानन्तरं यदि दर्शः पूर्वमागच्छेत् तदा दर्शकालात् पूर्वमेव पौर्णमासं कृत्वा स्वकाले दर्शं कुर्यात् ॥ २ ॥

अकुर्वन् पौर्णमासीमाकाङ्क्षेदित्येके ॥ ३ ॥

पूर्वोपपन्नमेकदेशम् । आगामिनीं पौर्णमासीमाकाङ्क्षेदित्येक आहुः । तामारभ्यानुष्ठानं स्पष्टम् ॥ ३ ॥

अपराह्णे स्नात्वौपवसथिकं दम्पती भुञ्जीयाताम् ॥ ४ ॥

स्नानमपि मध्यन्दिनादूर्ध्वमेव, कर्माङ्गं तु तत्। यजनीयात्पूर्वमहः उपवसथं तदहर्योग्यं यच्छास्त्रान्तरदृष्टमशनीयं तदौपवसथिकम्। तदुक्तं मांसमद्ये[1] नाश्नीयाताम्, इति ॥ ४ ॥

मानदन्तव्य उवाच श्रेयसीं प्रजां विन्दते काम्यो भवत्यक्षोधुको य औपवसथिकं भुङ्क्ते ॥

मानदन्तव्य इति ऋषिः। विन्दते लभते। काम्यः प्रियदर्शनः। अक्षोधुकः क्षुत्पिपासारहितः ॥५॥

तस्माद्यत्कामयेत तद्भुञ्जीत ॥ ६ ॥

यदीच्छेत् प्रजादीनि तदौपवसथिकं भुञ्जीत। नित्यादेवानुषङ्गिकं फलमिदं, स्तुतिमात्रं वा। रात्रौ न भोजनम्, अपराह्णग्रहणस्य सर्वाहर्नियमार्थत्वात्। यतो रागप्राप्तस्यायं नियमः अत उपवासेऽपि न वैगुण्यम् ॥ ६ ॥

नाव्रत्यमाचरेत् ॥ ७ ॥

व्रतविरोधि मधुमांसभक्षणादि न कुर्यात् आ प्रयोगसमाप्तेः ॥

प्रातराहुतिं हुत्वा ॥ ८ ॥

दर्शपूर्णमासौ कर्तव्याविति शेषः। अनयोः पूर्वेद्युरुपक्रान्तत्वात् प्रातराहुतेश्च 'सर्वमहः प्रातराहुतः स्थानम्' इत्या-

[1] क. मांसमाज्ये.

स्तमयात् कालाभ्यनुज्ञानात् प्रातराहुतिः पश्चात् स्यादिति तन्निवृत्तये पूर्वत्वं नियम्यते ॥ ८ ॥

हविर्निर्वपेदमुष्मै त्वा जुष्टं निर्वपामीति देवताश्रयं सकृद्यजुषा द्विस्तूष्णीम् ॥ ९ ॥

यद्धविश्शास्त्रान्तरे प्रज्ञातं व्रीहितण्डुला यवतण्डुला वा तद्धविः पाणिना गृहीत्वा मुष्टिपूर्णं 'अग्नये त्वा जुष्टं निर्वपामि' इति निर्वापवद्यथादैवतं चरुस्थाल्यां सकृदावपेत् द्विरमन्त्रकम् । ब्रह्मोपवेशनान्तं कृत्वा निर्वापः, अस्यापि ब्रह्मापेक्षत्वात् ॥ ९ ॥

त्रिर्देवेभ्यः प्रक्षालयेत् ॥ १० ॥

उदकेन प्रक्षाळनम् । प्रकृतत्वात्सिद्धे देवेभ्य इत्यन्यत्रापि यद्देवेभ्यः प्रक्षाळनं तत्त्रिरेवेत्येवमर्थम् । यथौपासनहोमे ॥ १० ॥

अथ प्रक्षालनप्रसङ्गादुच्यते--

द्विर्मनुष्येभ्यः ॥ ११ ॥

भोजनार्थे पाके द्विः प्रक्षालनम् । असत्यपि पाके यत्र प्रक्षालनं विहितं तत्रापि द्विरेव ॥ ११ ॥

सकृत्पितृभ्यः ॥ १२ ॥

श्राद्धेऽन्वष्टक्यादौ च असत्यपि पाके पूर्ववत् ॥ १२ ॥

अथ प्रकृतमाह—

मेक्षणेन प्रदक्षिणमुदायुवं श्रपयेत् ॥ १३ ॥

मेक्षणं दर्वी। यथा पाक्तिवैषम्यमुदकस्य वा बहिर्निर्गमनं न भवेत् तथोदायुवं पचेत्। यदि बहिर्निर्गच्छेत् उदकं 'ययोरोजसा' इत्यप आसिञ्चेत्, 'यद्यज्ञ उल्बण क्रियते तदप उपनिनयेत् 'ययोरोजसा स्कभिता रजांसि बीर्येभिर्वीरतमा शविष्ठाः। यावत्येते अप्रतीता सहोभिः विष्णो अगन्वरुणा पूर्वहूतौ स्वाहा' इति श्रुतेः ॥ १३ ॥

अस्मिन् काले परिस्तरणम्, आज्यसंस्कारश्च, संस्कारापेक्षत्वात् शृताभिघारणस्य। तत आह--

शृतमभिघार्योदगुद्वास्य प्रत्यभिघारयेत्॥१४॥

स्रुवेणाज्येनाभिघारणम् ॥ १४ ॥

सर्वाण्येवं हवींषि ॥ १५ ॥

सर्वाणीति व्याप्त्यर्थम्। एवं निर्वापादि। हवींषीति भोजनार्थे श्राद्धार्थे कृसरस्थालीपाकादौ च निवृत्त्यर्थं, न हि तेषु पाकावस्थायां हविष्ट्वं, देवतोद्देशाभावात्। औपासनवैश्वदेवहोमयोरप्येकदेशस्यैव देवतोद्देशेनोपादानं 'अन्नस्य' इति षष्ठीनिर्देशात्। अतस्तयोरपि पाकावस्थायां न हविष्ट्वम् ॥ १५ ॥

बर्हिषि साद्य ॥ १६ ॥

साद्यानीत्यर्थः। छान्दसः शेर्लुक्। बहुवचनात् सर्वाण्येव होमाङ्गानि साद्यानि, आज्यं चरुः स्रुवः जुहूः इध्म इति। बार्हीषीति सिद्धवन्निर्देशात् स्तरणावस्थायामेव तथा स्तरणं यथा तत्र सादनं भवेत्। इतरेतरयोगाच्च हविस्सादनावस्थायामेव उत्तरत-

स्सर्वेषां सादनम्। बहुलवचनाल्लुक् कृतोऽस्य बहुविषयत्वं गमयितुम्। अतो विवाहादिष्वपि होमाङ्गानामेव सादनम्। औपासनादिषु दर्भाभावादुत्तरतो भूमावेव सादनं प्राक् पर्युक्षणात्। एवं प्रयोगक्रमः—प्रातराहुतिं हुत्वा ब्रह्मोपवेशनान्तं कृत्वा चरुं श्रपयित्वा परिस्तीर्य दर्भेषूपविश्याज्यं संस्कृत्याभिघार्य हवींष्युत्तरतस्सर्वाणि सादयित्वा परिषेचनादि प्रपदान्तं कुर्यात् ॥ १६ ॥

तत आह —

आज्यभागौ जुहुयाच्चतुर्गृहीतमाज्यं गृहीत्वा पश्चावत्तं भृगूणां जामदग्न्यानामग्नये स्वाहेत्युत्तरतस्सोमायेति दक्षिणतः ॥ १७ ॥

आज्यभागाविति संज्ञा व्यवहारार्था। स्रुवेणादायाज्यं जुह्वामासिच्य जुह्वैव चतुर्गृहीतं जुहुयात्। स्रुवेण स्रुच्याज्यं गृह्णीयात्[1] इति परिभाषादर्शनात् गृह्यान्तरदर्शनाच्च स्रुवजुह्वोः प्राप्तिः। स्रुवस्य तु विवाहप्रकृतित्वादपि प्राप्तिरस्त्येव। गृहीत्वेति प्रत्येकं चतुर्ग्रहणार्थं, पौनःपुन्येऽपि कृत्वाविधानात् ॥ १७ ॥

विपरीतमितरे ॥ १८ ॥

सोमाय स्वाहेति दक्षिणतो हुत्वाऽग्नये स्वाहेत्युत्तरत इत्यन्य आचार्या आहुः ॥ १८ ॥

आज्यमुपस्तीर्य हविषोऽवद्येन्मेक्षणेन मध्यात् पुरस्तादिति ॥ १९ ॥

[1] आज्यं जुहुयात्। इति पा ॥

स्रुवेण जुह्वामुपस्तीर्य हविषोऽङ्गुष्ठपर्वपृथुमात्रमवखण्ड्य हस्तेन जुह्वां निदध्यात् । इतिशब्दः पञ्चसमाप्तयर्थः ॥ १९ ॥

पश्चाच्च पश्चावत्ती ॥ २० ॥

भृगुजामदग्न्यादयः ॥ २० ॥

अभिघार्य प्रत्यनक्त्यवदानस्थानानि ॥ २१ ॥

स्रुवेण जुहूस्थं हविरभिघार्य आज्येन अवदानस्थानानि यथाक्रममवनक्त्याज्येन ॥ २१ ॥

न स्विष्टकृतः ॥ २२ ॥

स्विष्टकृतोऽवदायावदानस्थानं न प्रत्यनक्ति । प्रत्यञ्जनप्रतिषेधादेवेदं सर्वं स्विष्टकृतोऽपि तुल्यमिति गम्यते ॥ २२ ॥

अमुष्मै स्वाहेति जुहुयाद्यद्देवत्यं स्यात् ॥ २३ ॥

अग्नये स्वाहेतिवत् यथादेवतमग्निमध्ये जुह्वा जुहुयात् । एतत्प्रधानं, अत एतद्व्यतिरिक्तं सर्वं क्रतुतन्त्रेषु प्रवर्तते ॥ २३ ॥

स्विष्टकृतस्सकृदुपस्तीर्य द्विर्भृगूणां सकृद्ध्विषो द्विरभिघार्याग्नये स्विष्टकृते स्वाहेति प्रागुदीच्यां जुहुयात् ॥ २४ ॥

शोभनमिष्टं द्रव्यप्रतिपत्तिद्वारेण करोतीति स्विष्टकृद्यागः । अतोऽप्रधानमिदम् । सकृदुपस्तीर्येत्यनूद्यते भृगूणां जामदग्न्यानां द्विरुपस्तरणविशेषं विधातुम् । मध्यात्पुरस्तात्पश्चादित्येतेषां प्रत्याम्नायः सकृद्ध्विष इति । उत्तरार्धादवदानं 'उत्तरार्धात्स्व-

प्रकृतः' इति श्रुतेः, गृह्यान्तरविधानाच्च । द्विरभिघार्येति सकृत्प्रत्याम्नायः । प्रागुदीच्यामिति मध्यप्रत्याम्नायः । अथोपरिष्टाद्धोमः आज्येन व्याहृतिभिः तिसृभिः[1] प्राजापत्यया च ॥ २४ ॥

तत आह—

समिधमाधाय ॥ २५ ॥

परिषिञ्चेदित्यध्याहारः । 'समिधमाधायानुपर्युक्षेत्' इति गौतमीयवचनात् । पूर्वनिहितां समिधमग्नावाधाय 'अदितेऽन्वमंस्थाः, अनुमतेऽन्वमंस्थाः, सरस्वत्यन्वमंस्थाः, देव सवितः प्रासावीः' इति पूर्ववत्परिषेचनम् । गृह्यान्तरान्मन्त्रप्राप्तिः ॥ २५ ॥

दर्भानाज्ये हविषि वा त्रिरवधायाग्रमध्यमूलान्यक्तं रिहाणा वियन्तु वय इत्यभ्युक्ष्याग्नावनुप्रहरेत् यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा पशूनस्माकं मा हिंसीरेतदस्तु हुतं तव स्वाहा इति ॥ २६ ॥

प्रतिपत्तिकर्मेदम्, दर्भानिति द्वितीयानिर्देशात् । अत एव स्तृतान् सर्वान् दर्भान् शिष्ट आज्ये हविषि वा सकृन्मन्त्रमुक्त्वाऽग्राणि मध्यानि मूलानि च क्रमशस्सम्मृज्य पुनश्चैवं द्विस्सम्मृज्याद्विरभ्युक्ष्याग्रपूर्वं प्रक्षिपेत् ॥ २६ ॥

तद्यज्ञवास्तु ॥ २७ ॥

तत् पूर्वसूत्रोक्तं कर्म यज्ञवास्तु । संज्ञा व्यवहारार्था ॥२७॥

---

[1] चतसृभिः. पा.

सर्वत्र कुर्यात् ॥ २८ ॥

समिद्दर्भवत्सु कर्मसु सर्वत्र कुर्यात् । अध्याहारात्सिद्धे कुर्यादिति वामदेव्यगानार्थम् ॥ २८ ॥

हविरुच्छिष्टमुदगुद्वास्य ब्रह्मणे दद्यात् ॥ २९ ॥

हविर्ग्रहणमाज्यव्युदासार्थम् । उच्छिष्टमिति स्वयं किञ्चित्प्राश्यावशिष्टस्य दानार्थम् । पूर्वमेवोदग्देशस्थितत्वे सिद्धे उदग्ग्रहणमुदग्देशात्स्थाल्या सहोद्वासनार्थं. अन्यथा स्थाल्या ओदनस्योद्वासनमाशङ्क्येत । चतुर्थ्यैव सिद्धे दद्यादिति स्वयं ब्रह्मत्वेऽप्यन्यस्मै दानार्थम् ॥ २९ ॥

पूर्णपात्रं दक्षिणा ॥ ३० ॥

ओदनेन तण्डुलैर्वा तदभावे फलैर्वा सम्पूर्णं पात्रं ब्रह्मणे दक्षिणां दद्यात् । स च तूष्णीं ओमिति वा प्रतिगृह्णीयात् ॥

यथोत्साहं वा ॥ ३१ ॥

यथा ब्रह्मा उत्साही भवति तथा दद्यात् । तदभिलषितं दद्यादित्यर्थः । आज्यतन्त्रेष्वपि यथोत्साहमेव दक्षिणा ॥ ३१ ॥

इति रुद्रस्कन्दकृतायां गृह्यवृत्तौ द्वितीयस्य पटलस्य
प्रथमः खण्डः.

प्रकृतस्य प्रधानदेवता आह—

आग्नेयस्थालीपाकोऽनाहिताग्नेर्दर्शपूर्णमासयोः।

गृहस्थस्यानाहिताग्नेर्दर्शपूर्णमासयोराग्नेयस्थालीपाकः। 'अग्नये त्वा जुष्टं निर्वपामि' इति निर्वापः। 'अग्नये स्वाहा' इति होमः ॥ १ ॥

अग्नीषोमीयः पौर्णमास्यामाहिताग्नेः ॥ २ ॥

'अग्नीषोमाभ्यां त्वा जुष्टं निर्वपामि' इति निर्वापः। 'अग्नीषोमाभ्यां स्वाहा' इति होमः ॥ २ ॥

ऐन्द्रो माहेन्द्रो वैन्द्राग्नो वाऽमावास्यायाम् ॥

इष्टिवद्विनिवेशः। 'इन्द्राय त्वा जुष्टं निर्वपामि' इति 'महेन्द्राय त्वा जुष्टं निर्वपामि' इति 'इन्द्राग्निभ्यां त्वा जुष्टं निर्वपामि' इति निर्वापः। 'इन्द्राय स्वाहा, महेन्द्राय स्वाहा, इन्द्राग्निभ्यां स्वाहा' इति होमः ॥ ३ ॥

यथा वाऽनाहिताग्नेः ॥ ४ ॥

दर्शे च पौर्णमासे चानाहिताग्नेर्यथा तथेत्यर्थः ॥ ४ ॥

सर्वमहः प्रातराहुतेस्स्थानम् ॥ ५ ॥

सर्वमिति पूर्वाह्णासम्भवे अपराह्णेऽपि होमार्थम् ॥ ५ ॥

रात्रिस्सायमाहुतेः ॥ ६ ॥

स्पष्टम् ॥ ६ ॥

सर्वोऽपरपक्षः पौर्णमासस्य ॥ ७ ॥

सर्वं इत्युपक्रान्तस्य पूर्वाह्णातिक्रमेऽप्यपराह्णे समाप्तयर्थम्, तदतिक्रमेऽपि रात्रौ। अनुपक्रान्तस्य तु स्वकाले 'अपराह्णे स्नात्वा' इत्याद्यहरन्तरेऽपि भवत्येव ॥ ७ ॥

पूर्वपक्षो दार्ढ्यस्य ॥ ८ ॥

सर्वं इत्यनुवर्तते। आपत्काला एते, अन्यथा 'अस्तमिते होमः' इत्यादेर्वैयर्थ्यप्रसङ्गात्। उत्तरहोमोपक्रमकालात् प्रागेवैते कालाः आपत्कालत्वाच्च। यथासम्भवं न कालोत्कर्षः कार्यः ॥

अभोजनेन संतनुयादित्येके ॥ ९ ॥

स्वकालात्यये अभोजनेन तत्कार्यसिद्धिरित्यन्ये आचार्या आहुः। आ स्वकालात्ययादभोजनेन तत्कार्यसिद्धिरित्यर्थः। वाक्यशेषात्सिद्धे सन्तनुयादित्यविच्छेदस्य विवक्षितत्वं दर्शयति। अतः कालात्ययेऽपि प्रायश्चित्तं कृत्वैवोत्तरस्य करणम्। अधिकारैक्ये सति सन्ध्योपासनादिलोपेऽप्यभोजनेनापि सन्तानं भवत्येव।

वेदोदितानां नित्यानां कर्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥

इति मनुवचनाच्च ॥ ९ ॥

अविद्यमाने हव्ये यज्ञियानां फलानि जुहुयात्

औपासनहोमेऽग्निपक्वान्यपक्वानि वा। वैश्वदेवे पक्वान्येव। दर्शपूर्णमासयोर्निर्वापादि कृत्वा ॥ १० ॥

पलाशानि वा ॥ ११ ॥

फलाभावे यज्ञियानां पर्णानि वा जुहुयात् । पूर्ववत्पाकानियमः ॥ ११ ॥

अपो वा ॥ १२ ॥

सर्वत्रापां प्रक्षालनं श्रपणं च नास्ति अर्थलोपात् ॥ १२ ॥

हुतं हि ॥ १३ ॥

हिशब्दो हेतौ । यस्मादापत्काले मुख्यद्रव्यालाभनिमित्तगौणद्रव्येण च हुते हुतमेव भवति अतो न तत्र वैगुण्यनिमित्तं प्रायश्चित्तमित्यर्थः ॥ १३ ॥

सन्तनुयादित्युक्तं, कथमहुतस्य सन्तानमित्यत आह—

प्रायश्चित्तमहुतस्य ॥ १४ ॥

अतिपन्नकालस्य प्रायश्चित्तं सन्तानार्थं भवतीत्यर्थः । प्रायश्चित्तं तु प्राजापत्यादुक्तमेव । सूत्रान्तरमतात्प्रतिहोमं वा कुर्यात् ॥ १४ ॥

आज्यं जुहुयाद्धविषोऽनादेशे ॥ १५ ॥

आज्य जुहुयादनादेशे इति सिद्धे हविष इति हविषस्संस्कारमपि 'शृतमभिघार्य' इत्यादिष्वाज्यमेव स्यादित्येवमर्थम् ॥

देवतामन्त्रानादेशे ॥ १६ ॥

यद्देवत्यं हविरुक्तं तद्देवताहोममन्त्रस्स्यात् । 'अग्नये स्वाहा' इतिवत् ॥ १६ ॥

प्रथमगर्भे तृतीये मासि पुंसवनम् ॥ १७ ॥

सर्वगर्भार्थोऽयं संस्कारः आधारसंस्कारद्वारेण सकृदेव क्रियते । भार्यान्तरे तु कर्तव्यमेव प्रथमगर्भे । दर्शादूर्ध्वमा दर्शादेको मासः । यत्र कच दिनेऽप्याहिते गर्भे स एको मासो गणयितव्यः । संज्ञा व्यवहारार्था । कृत्स्नाग्रावेव । मासीति मास* इत्यर्थः । अत्र कश्चित् अतिक्रान्तेऽपि मुख्यकाले प्रसवात् प्राक्कालातिक्रमप्रायश्चित्तं कृत्वा कर्तव्यमेवेत्याहुः, उपनयने दर्शनात्, तेन च स्मृतिषु तुल्यवद्गणनात्, कासुचत्स्मृतिषु कालानिर्देशेन विधानादापत्कल्पतयाऽभ्यनुज्ञानं सर्वदा संस्काराणामस्त्येवेत्याहुः । जननादूर्ध्वं तु द्वाराभावात् प्रायश्चित्तेनैव जातं संस्कुर्यादेकदेशेऽग्नौ । गर्भान्तरार्थं तु द्वितीये गर्भे कुर्यादेव । अपरे तु कालात्यये अधिकाराभावात् प्रायश्चित्तमेवाहुः। पूर्व एव तु पक्षः श्रेयान् । 'अथापि लोपसंशये लोपादलोपो न्यायतरः' इति निदानकारोऽप्याह ॥ १७ ॥

स्नातामहतेनाच्छाद्य हुत्वा पतिः पृष्ठतस्तिष्ठेत्॥

अहतेन अधरेणोत्तरीयेण च । ब्रह्मोपवेशनान्तं कृत्वा वधूं दक्षिणतो दर्भेषूपवेश्य प्रपदान्तं कृत्वाऽन्वारब्धायां व्याहृतिभिस्तिसृभिराज्यं हुत्वा पुनश्च† हुत्वा वध्वाः पश्चाद्दर्भेषु तिष्ठेत् । पतिरिति भर्तुरभावे पालनाधिकृतनियमार्थम् । भर्तुरन्यः कुर्वन् प्रणीते लौकिके वा कुर्यात् ॥ १८ ॥

दक्षिणमंसमन्ववमृश्यानन्तर्हितं नाभिदेशमभिमृशेत्पुमांसाविति ॥ १९ ॥

---

* मासे अतिक्रान्ते. इति ग्र. कोशे. † व्याहृतिभिः इत्यधिकः पाठः.

अन्विति वधूमनुगतः प्रह्वीभूत इत्यर्थः। वध्वा अंसमन्ववमृश्य वस्त्रादिनाऽनन्तर्हितमभिमृशन्नेव पाणिना नाभिं प्रापय्य सकलमेवोदरं मन्त्रेणाभिमृशेत् ॥ १९ ॥

अथापरं न्यग्रोधशुङ्गामुभयतःफलामस्त्रामामक्रिमिपरिसृतां त्रिस्सप्तैर्यवैः परिक्रीयोत्थापयेन्माषैर्वा सर्वत्रौषधयस्सुमनसो भूत्वाऽस्यां वीर्यं समाधत्तेयं कर्म करिष्यतीति[1] ॥ २० ॥

अथेत्यानन्तर्यार्थेन प्रयोगैक्यमाह। अतो नान्तरा ब्राह्मणभोजनम् । अपरमिति कर्मान्तरत्वमाह । अतो वामदेव्यगानान्तं कृत्वा ब्रह्मणे दक्षिणां दत्वा वक्ष्यमाणं कर्म कुर्यात् । कर्मद्वयात्मकमिदमेकं पुंसवनाख्यं कर्म। अस्त्रामां अशुष्काम् । न्यग्रोधाधिदेवताभ्यः परिक्रीणामीत्यनया बुद्ध्या सप्तभिर्यवैर्मूल्यतया सङ्कल्पितैरशुङ्गां परिताम्रैः प्रक्रीय शुङ्गामूर्ध्वाग्रां मन्त्रेण विकर्षेत् यथाच्छिद्येत । यवाभावे माषैः ॥ २० ॥

आहृत्य वैहायसीं कुर्यात् ॥ २१ ॥

गृहमाहृत्यापर्यनाच्छादिते देशे शुङ्गां निदध्यात् ॥ २१ ॥

कुमारी ब्रह्मचारी व्रतवती वा ब्राह्मणी पेषयेदप्रत्याहरन्ती ॥ २२ ॥

[1] करिष्यसीति.

कुमारी च ब्राह्मणी । ब्रह्मचारी च ब्राह्मणः । वाग्यता ब्राह्मणी वा दृषत्पुत्रं प्रतीचीं दिशं प्रत्यप्रत्याकर्षन्ती पेषयेत् ॥

स्नातां संवेश्य दक्षिणे नासिकास्रोतस्यासिञ्चेत् पुमानग्निरिति ॥ २३ ॥

पुनस्स्नातामग्नेः पश्चात् प्राक्शिरसं दर्भेषु संवेश्य शाययित्वा तस्याः दक्षिणे नासिकारन्ध्रे शुङ्गारसमासिञ्चेत् । सा च तं रसमुदरस्थं कुर्यात् । अथ ब्राह्मणभोजनम् ॥ २३ ॥

अथास्याश्चतुर्थे मासि षष्ठे वा सीमन्तोन्नयनम् ॥ २४ ॥

अथेत्यकृतेऽपि तृतीये मासि पुंसवने अस्मिन् काले पुंसवनं कृत्वा सीमन्तकरणार्थम् । अस्या इति प्रथमगर्भनियमार्थम् ॥ २४ ॥

स्नातामहतेनाच्छाद्य हुत्वा पतिः पृष्ठतस्तिष्ठन्ननुपूर्वया फलवृक्षशाखया सकृत्सीमन्तमुन्नयेत् त्रिश्वेतया च शलल्याऽयमूर्जावतो वृक्ष इति ॥ २५ ॥

अनुपूर्वयेति न्यग्रोधशुङ्गाधर्मयुक्तयेत्यर्थः । फलवृक्ष उदुम्बरः 'ऊर्वा उदुम्बरः' इति श्रुतेः । 'अयमूर्जावतो वृक्षः' इति च मन्त्रवर्णात् । तद्वदेव शाखामाहृत्य वैहायसीं कृत्वा पुंसवनवत् पृष्ठतः स्थानान्तं कृत्वा तया शाखया मूर्ध्नि गतान्

वध्वाः केशान् प्रत्यञ्चमुन्नयेत् । 'कृणोमि' इति मन्त्रान्तः । ततास्त्रिषु देशेषु श्वेतया वराहसूच्या तद्वदेव 'राकामहम्' इत्युन्नयेत् । 'रराणा' इति मन्त्रान्तः ॥ २५ ॥

कृसरः स्थालीपाकः ॥ २६ ॥

कृसरः तिलामिश्रः पाकधर्मयुक्तो भवेत् चौले 'वृथा पक्वः' इति विशेषणात् । निर्वापमन्त्रस्तु नास्ति देवताऽभावात् ॥२६

उत्तरघृतमवेक्षतीं पृच्छेत् किं पश्यसीति ॥२७

स्पष्टम् । उत्तरे घृते यथा छाया दृश्यते तथा घृतसेकः॥

प्रजामिति वाचयेत् ॥ २८ ॥

पतिः । अथोपरिष्टाद्धोमादि ब्राह्मणभोजनान्तम् । वधूः स्थालीपाकमश्नीयादिति गृह्यान्तरोक्तम् ॥ २८ ॥

प्रतिष्ठिते वस्तौ सोष्यन्तीहोमः ॥ २९ ॥

वस्तौ गर्भे प्रतिष्ठते स्वस्थानात् प्रच्युते, प्रोपसर्गस्तिष्ठतिर्गमनवाचकः । प्रतिगर्भमेतत् जायमानार्थत्वात् । प्रणीतेऽग्नावेतत् । नात्रान्वारम्भः अतत्संस्कारत्वात् । अकृते यदि जननं स्यात् न तत्र पुनः क्रिया 'जनिष्यते' इति मन्त्रलिङ्गात् । तत्राशौचात् ऊर्ध्वं प्रायश्चित्तेनैव संस्कारः ॥ २९ ॥

या तिरश्चीति द्वाभ्याम् ॥ ३० ॥

प्रपदान्तं कृत्वा व्याहृतिभिस्तिसृभिः हुत्वा 'या तिरश्ची' इति हुत्वा 'विपश्चित्पुच्छम्' इति जुहुयात् ॥ ३० ॥

असाविति नाम दध्यात् ॥ ३१ ॥

यदि पुत्रनामाभिलषितं 'विष्णुशर्मानाम' इतिवत् मन्त्रस्थेऽसौशब्दे नाम निदध्यात् । युग्माक्षरं ब्राह्मणस्य माङ्गल्यं शर्मवत्स्यात् । बलरक्षान्वितं क्षत्रियस्य । धनपुष्टिसंयुतं वैश्यस्य । जुगुप्साप्रेष्यसंयुतं शूद्रस्य ॥ ३१ ॥

युग्माक्षरं ब्राह्मणस्य द्व्यक्षरं चतुरक्षरम् ।
माङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम् ॥
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ।
शर्मवद्ब्राह्मणस्य स्यात् राज्ञो रक्षासमन्वितम् ॥
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम् ॥
इति मनुवचनाच्च ॥

तद्गुह्यम् ॥ ३२ ॥

वैदिककर्मार्थमेतत् । व्यावहारिकं त्वन्यदेव गुह्यत्वोक्तेः । नामापरिज्ञाने आभिचारादयसिद्धिः फलम् ॥ ३२ ॥

प्राङ्नाभिकृन्तनात् स्तनदानाच्च व्रीहियवौ पेषयेच्छुङ्गावृता ॥ ३३ ॥

प्रागिति विसमासः प्राङ्नाभिकृन्तनादसम्भवे स्तनदानात्प्राक् कर्तुम् । द्विबचनाद्व्यक्तिद्वयम् । जात्यभिप्रायेणेति केचित् । शुङ्गावृता शुङ्गाप्रकारेण 'कुमारी ब्रह्मचारी व्रतवती वा ब्राह्मणी पेषयेदप्रत्याहरन्ती' ॥ ३३ ॥

अङ्गुष्ठेनानामिकया चादाय कुमारं प्राशयेदियमाज्ञेति ॥ ३४ ॥

अङ्गुष्ठानामिकाभ्यामिति सिद्धे पृथग्ग्रहणं विषयद्वयसूचनार्थम् । अन्नप्राशनमप्याभ्यामेवेति । चशब्दोऽन्नप्राशनेऽप्येतन्मन्त्रप्रापणार्थः ॥ ३४ ॥

सर्पिश्च मेधां त इति ॥ ३५ ॥

चशब्दः पूर्ववत् मेधां ते मित्रावरुणाविति मन्त्रनियमार्थः, अन्नप्राशने आभ्यां मन्त्राभ्यां अन्नमेव प्राशयेत् । कालस्तु 'षष्ठेऽन्नप्राशनं मासे' इति स्मृत्यन्तरात् गम्यते । केचित्— चशब्दो हिरण्यमधुसमुच्चयार्थ इत्याहुः । तथाच मनुः— 'हिरण्यमधुसर्पिर्भ्याम्' इति ॥ ३५ ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ द्वितीयस्य पटलस्य द्वितीयः खण्डः

जननाज्जयोत्स्ने तृतीये तृतीयायां प्रातः स्नाप्य कुमारमस्तमिते शान्तासु दिक्षु पिता चन्द्रमसमुपतिष्ठेत् प्राञ्जलिः ॥ १ ॥

मातुः पितुर्वा रुच्या यदाकदाचित् शिशोर्निष्क्रमणे प्राप्ते तदुपक्रमनियमोऽयम् । दैवान्मानुषाद्वा हेतोः निष्क्रमणे कृतेऽपि संस्कारार्थमस्मिन् काले कुर्यादेव । एवमुत्तरत्रापि । कालात्यये तूक्त एव न्यायः सर्वेषु संस्कारेषु । ज्योत्स्ना चन्द्रप्रभा तद्योगात् पूर्वपक्षो ज्योत्स्नः । जननादूर्ध्वं ये ज्योत्स्नाः तेषां तृतीये तृतीयायां तिथावित्यर्थः । यदि पूर्वपक्षे जननं स्यात् नासौ गण-

यितव्यः । कृत्स्नस्य जननादूर्ध्वत्वाभावात् । तथा च मनुः— 'चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात्' इति । उपस्थानकाले तृतीयानियमः । शान्तासु उपरतादित्यरश्मिषु दिक्षूपतिष्ठेदिति दर्भेषु तिष्ठेत् चन्द्राभिमुखो वक्ष्यमाणप्रकारेण कुमारमादाय मन्त्रैश्चन्द्रमसमभिदध्यादित्यर्थः ॥ १ ॥

शुचिनाऽऽच्छाद्य माता प्रयच्छेदुदक्छिरसम् ॥

वस्त्रेणाच्छाद्य दक्षिणतः स्थित्वा कुमारं पित्रे प्रयच्छेत् ॥

अनुपूर्वं गत्वोत्तरतस्तिष्ठेत् ॥ २ ॥

पूर्वशब्दो दिग्वाची । अनु पृष्ठं गत्वा पितुरुत्तरतः प्रत्यङ्मुखो दर्भेषु तिष्ठेन्माता ॥ २ ॥

यत्ते सुसीम इति तिसृभिरुपस्थायोदश्चं मात्रे प्रदाय यदद इत्यपामञ्जलिमवसिञ्चेत् ॥ ४ ॥

उदश्चं उदक्छिरसम् । प्रातःकाले पात्रेण पूर्णं गृहीता आपः स्युस्ताभिर्दर्भेषु दक्षिणतस्तिष्ठन् ब्राह्मणोऽञ्जलिं पूरयेत्, तं भूमावसिञ्चेत् ॥ ४ ॥

द्विस्तूष्णीम् ॥ ५ ॥

अमन्त्रकं द्विरवसिञ्चेत् ॥ ५ ॥

जननादूर्ध्वं दशरात्राच्छतरात्रात्संवत्सराद्वा नाम कुर्यात् ॥ ६ ॥

जननदिवसादूर्ध्वं यो दशरात्रः तस्मादूर्ध्वं यदहस्तस्मि-

न्नित्यर्थः । द्वादशेऽहनीति यावत् । एवमुत्तरयोः पक्षयोः । नात्रोदगयनपूर्वपक्षादरः, क्वचित्सम्भवस्य नियतत्वात् । असम्भवेऽपि न तद्वशेन कालविनिवेशः, वैरूप्यप्रसङ्गात् ॥ ६ ॥

स्नाप्य कुमारं करिष्यत उपविष्टस्य शुचिनाऽऽच्छाद्य माता प्रयच्छेदुदक्छिरसम् ॥ ७

होमारम्भात्पूर्वं दर्भेषूपविष्टस्य शुचिना वस्त्रेणाच्छाद्य दक्षिणत उपविश्य प्रयच्छेत् ॥ ७ ॥

अनुपृष्ठं गत्वोत्तरत उपविशेत् ॥ ८ ॥

दर्भेषु माता ॥ ८ ॥

हुत्वा कोसीति तस्य मुख्यान् प्राणानभिमृशेत्

उदक्छिरसं कुमारं स्वाङ्के धारयन् प्रपदान्ते कृत्वा द्विस्तिसृभिर्व्याहृतिभिर्हुत्वा कुमारस्य चक्षुषी श्रोत्रे नासिके चाभिमृशेत् ॥ ९ ॥

असाविति नाम कुर्यात्तिदेव मन्त्रान्ते ॥ १० ॥

यत्सोष्यन्तोहोमे तदेव । परिददातु विष्णुशर्मन्निति वत् कुर्यात् । मन्त्रान्तेऽसौशब्दं न मध्ये ॥ १० ॥

मात्रे ॥ ११ ॥

प्रयच्छेदुदक्छिरसामिति शेषः ॥ ११ ॥

प्रथममाख्याय ॥ १२ ॥

मात्र इत्यनुवर्तते । प्रथमशब्दस्य द्वितीयापेक्षत्वात् प्रथमं गुह्यं नाम मातुरुक्त्वा द्वितीयमपि व्यावहारिकं नामेदानीं ब्रूयादित्यर्थः । ततो ब्राह्मण भोजनम् ॥ १२ ॥

विप्रोष्यङ्गादङ्गादिति पुत्रस्य मूर्धानं परिगृह्णीयात् ॥ १३ ॥

ग्रामान्तरे त्रिरात्र*मुषित्वा यदाऽऽगच्छति तदा परितः उभाभ्यां हस्ताभ्यां गृह्णीयात् । विप्रोष्याङ्गादिति प्राप्ते बहुलवचनाद्ह्रस्वत्वमस्य बहुविषयत्वं द्योतयितुम् । अतः प्रतिपुत्रमेतद्विप्रोष्य कर्तव्यम् ॥ १३ ॥

पशूनां त्वेत्यभिजिघ्रेत् ॥ १४ ॥

मूर्धन्यभिजिघ्रेत् । असौशब्दे विष्णुशर्मन्निति वत् ब्रूयात् ॥

तूष्णीं स्त्रियाः ॥ १५ ॥

जातकर्मादि चौलान्तं मन्त्रवर्जं स्त्रियाः कुर्यात् । साङ्गस्तु होमो निवर्तते मन्त्रादिलोपे देवतोद्देशस्यापि लोपात् । मानवेऽप्युक्तं—

अमन्त्रका तु कार्येयं स्त्रीणामावृदशेषतः ।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥ इति ॥

उपनयनं तु नास्ति तत्स्थानापन्नतया विवाहस्य स्मरणात् । अतो विवाहात्प्रागनुपनीततुल्यमाचरेत् । ऊर्ध्वं तु भर्तृतुल्यं 'सहधर्मश्चर्यताम्' इति वचनात् । उपनयनाभावान्नाध्ययनम् ।

* रेरात्रिव इत्यपिपाठः.

तदभावात्तदर्था नियमा जपाश्च न सन्ति । आहत्य विहितास्तु वचनबलाद्वदन्त्येवेति ॥ १५ ॥

तृतीये वर्षे चौलम् ॥ १६ ॥

अत्र जननादिमासगणनया द्वादशमासास्संवत्सरः, न चैत्रादिः ॥ १६ ॥

तत्र नापित उष्णोदकमादर्शः क्षुरो वौदुम्बरः पिञ्जूल्य इति दक्षिणतः ॥ १७ ॥

नापितो वपनकर्ता आयसक्षुरपाणिः 'आयसेन प्रच्छिद्य' इति वचनात् । उष्णोदकं कंसपात्रपूर्णं, आदर्शः, क्षुरः औदुम्बरो वा विकल्प्यते । दर्भपिञ्जूल्य एकविंशतिः एतान्यग्नेर्दक्षिणतः स्युः ॥ १७ ॥

आनडुहो गोमयः कृसरस्स्थालीपाको वृथापक्व इत्युत्तरतः ॥ १८ ॥

पुंगवशकृत्, पाकधर्मरहितोऽग्न्यन्तरशृतस्तिलमिश्रः स्थालीपाकश्चाग्नेरुत्तरतः स्याताम् ॥ १८ ॥

माता च कुमारमादाय ॥ १९ ॥

पृथङ्निर्देशः कर्तुरुत्तरतः उपवेशनार्थः । मातुर्न दर्भासनम् । चकारः उत्तरत इत्यस्यानुकर्षणार्थः । एतन्नापितादिस्थापनं ब्रह्मोपवेशनादूर्ध्वं स्यात् । एतान्यहोमार्थानि । अतः स्त्रिया अपि स्युः । अव्यावृत्तिरव्यवायश्च तेषां नावश्यं स्याताम् । तथा परिषेचनेऽपि नाभिपरिहरणम् ॥ १९ ॥

हुत्वाऽयमागादिति नापितं प्रेक्षेत्सवितारं ध्यायन् ॥ २० ॥

प्रपदान्तं कृत्वा मातृप्रयुक्ते कुमारेऽन्वारब्धे व्याहृतिभिस्तिसृभिर्हुत्वा पुनस्समस्तान्ताभिश्चतसृभिर्हुत्वा 'अयमागात्' इति नापितं प्रेक्षेत् सवितारं ध्यायन् ॥ २० ॥

उष्णेनेत्युष्णोदकं प्रेक्षेद्वायुं ध्यायन् ॥ २१ ॥

वायुं मनसा ध्यायन् ॥ २१ ॥

आप इत्युन्देत् ॥ २२ ॥

दक्षिणतः केशान् उष्णोदकेन क्लेदयेत् ॥ २२ ॥

विष्णोरित्यादर्शं प्रेक्षेदौदुम्बरं वा ॥ २३ ॥

स्पष्टम्* ॥ २३ ॥

ओषधय इति दर्भपिञ्जूलीस्सप्तोर्ध्वाग्रा अभिनिधाय ॥ २४ ॥

केशैस्संहत्य ॥ २४ ॥

स्वधित इत्यादर्शेन क्षुरेणौदुम्बरेण वा ॥ २५ ॥

दर्भाग्रयुक्तान् केशानन्यतरेण संयोजयेदित्यर्थः ॥ २५ ॥

येन पूषेति दक्षिणतस्त्रिः प्राञ्चं प्रोहेत् ॥ २६ ॥

आदर्शेन क्षुरेणौदुम्बरेण वा केशान् दर्भाग्रसंयुक्तांस्त्रिस्संमृज्यादित्यर्थः । मन्त्रस्यापि त्रिरावृत्तिः ॥ २६ ॥

*"ओदुम्बरं ताम्रमयं" इत्यधिकः पाठः क्वचित्.

सकृदायसेन प्रच्छिद्यानडुहे गोमये केशान् कुर्यात् ॥ २७ ॥

अमन्त्रकमेतत् ॥ २७ ॥

उन्दनप्रभृत्येवं पश्चादुत्तरतश्च ॥ २८ ॥

स्पष्टम् ॥ २८ ॥

त्र्यायुषमिति पुत्रस्य मूर्धानं परिगृह्य जपेत् ॥

उभाभ्यां हस्ताभ्यां परितो गृहीत्वा ॥ २९ ॥

उदङ्मुत्सृप्य कुशाली कारयेद्यथागोत्रकुलकल्पम्

वपनं कारयेन्नापितेन । गोत्रादिवशेन शिखाव्यवस्था स्मर्यते, तदनुसारेण नापितं संप्रेष्य होमं समापयेत् ॥ ३० ॥

अरण्ये केशान्निखनेयुः ॥ ३१ ॥

सर्वान् केशान् गोमयेन प्रच्छाद्य कर्मकरा निखनेयुः ॥ ३१ ॥

स्तम्बे निदधत्येके ॥ ३२ ॥

दर्भस्तम्बे ॥ ३२ ॥

गौर्दक्षिणा ॥ ३३ ॥

ब्राह्मणे देया । अत्रेदं चिन्त्यते—एते गर्भाधानादयस्संस्काराश्शरीरं संस्कुर्वन्तस्सर्वेष्वङ्गार्थेषु कर्मसु योग्यतातिशयं कुर्वन्ति । फलातिशयो योग्यतातिशये च । न पुनरयोग्यस्यैव योग्यतां कुर्वन्ति संस्कारवन्तमभिनिर्दिश्य पुरुषमात्रस्यैव कर्मणां विधा-

नात् स्वत एव विद्यमानत्वाद्योग्यतायाः । नाप्यकिञ्चित्कराः, आनर्थक्यप्रसंगात् । नापि स्वत एव पुरुषार्थाः संस्कारश्रुतिविरोधात् । योग्यतातिशयस्तु संभवति यथा पानीयस्य गन्धादि क्षुरादेश्च तैक्ष्ण्यादि । चौलपर्यन्तास्सर्वे संस्कारा अतिक्रान्तस्वकाला उपनयात् प्रागेव कालातिपत्तिप्रायश्चित्तं कृत्वा कर्तव्याः । ऊर्ध्वं त्वकृतानां लोप एव 'तद्वितीयं जन्म' इति जन्मान्तरव्यपदेशात् । संस्कारेषु द्विप्रकारं शास्त्रमस्ति एकं पितुरुपदेशकं पुत्रमुत्पादयेत् संस्कुर्याच्चेति । अपरं पुत्रस्यैते संस्कारा आत्मार्थतया कर्तव्या इति । नन्वस्वव्यापारे कथं प्रामाण्यम् । सत्यं, यदि व्यापारकर्तृता बोध्या स्यात्, कर्मजन्यस्य हि पुरुषार्थस्य पुरुषशेषतया जन्यता शब्देन बोध्यते । सा च कदाचित् स्वव्यापारात् स्यात् कदाचित्परव्यापारात् स्यात् । इयान्विशेषः स्वव्यापारे तत्सिद्धये स्वयमेव प्रवर्तते । परव्यापारे तु यदि स्वाधिकारादेव प्रवर्तमानमन्यं लभते तदोदास्ते प्रसङ्गात् कार्यसिद्धेः । अलाभे तु स्वयमेव प्रयोजयति केनाप्युपायेन । ननु असौ शिशुत्वात्प्रतिपत्तुं न शक्नोति गर्भाधानाद्यवस्थायां तु सुतरां प्रतिपत्त्यसंभवः । सत्यं, यदि यस्यैव फलं तस्यैव प्रतिपत्त्युत्पादकत्वेन शब्दस्य प्रामाण्यं स्यात् । 'स्वर्गकामो यजेत' इति स्वर्गकामिन इदं कर्तव्यमिति तस्यान्यस्य चाविशेषेण प्रमितिं जनयत्येव शास्त्रमुभयोरपि प्रमाणमेव । इयान्विशेषः—स्वर्गकामश्चेत् ममेदं कर्तव्यमिति प्रतिपद्यते । अन्यश्चेत् स्वर्गकामिन इदमिति प्रतिपद्यते न ममेदमिति कामसदसत्त्वोपाधिनिमित्तोऽसौ भेदो न शब्दस्य तत्र व्यापारः । अतः पिता तस्य कर्तव्यं शास्त्रेण निश्चित्यात्मनश्चावश्यं कर्तव्यतां प्रतिपद्य तत्करोति, पितुरभावे यः तद्रक्षणेऽधिकृतः । तदभावे

यः परोपकारं कर्तुं प्रवृत्तः, यो वा तं प्रत्यात्मनो गुरुत्वमिच्छति, हितैषी वा कश्चित् कुर्यात् कारयेद्वा । स्वाधिकारप्रवृत्तश्चेदात्मीयमेव द्रव्यं ब्रह्मणे दक्षिणां दद्यात् । तत्कार्यप्रवृत्तश्चेत्कुमारस्य यत्स्वं तदेव ॥ ३३ ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
द्वितीयस्य पटलस्य
तृतीयः खण्डः.

अष्टमे वर्षे ब्राह्मणमुपनयेत् ॥ १ ॥

अत्र गर्भाधानादि वर्षगणनं 'गर्भादिस्संख्या वर्षाणाम्' इति स्मृतेः । एवमुत्तरत्रापि । 'वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्' इति शास्त्रान्तरे दर्शनात् ताभ्यामविरोधादुदगयनस्य समुच्चयः । केचित्त्वाहुः—'शरदि वैश्यम्' इत्यनेन विरोधात्तेन च तुल्यश्रुतित्वाद्वसन्तादेर्विकल्प एवेति ॥ १ ॥

तस्या षोडशादनतीतः कालः ॥ २ ॥

आभिविधौ । आपत्कालोऽयं, अत ऊर्ध्वं व्रात्या भवन्ति । एवमुत्तरत्रापि ॥ २ ॥

एकादशे क्षत्रियम् ॥ ३ ॥

उपनयेदिति वर्तते ॥ ३ ॥

तस्या द्वाविंशात् ॥ ४ ॥

अनतीतः काल इत्यनुवर्तते ॥ ४ ॥

द्वादशे वैश्यम् ॥ ५ ॥

स्पष्टम् ॥ ५ ॥

तस्या चतुर्विंशात् ॥ ६ ॥

स्पष्टम् ॥ ६ ॥

कुशलीकृतमलङ्कृतमहतेनाच्छाद्य हुत्वाऽग्ने व्रत पत इति ॥ ७ ॥

कुशलीकृतं रूपम् । अलङ्कृतं चाङ्गम् । वपनालङ्कारौ । अतस्तौ चावश्यमुपनयनमुहूर्ते कर्तव्यौ । एष क्रमः—वपनं कृत्वा अलङ्कृत्य नान्दीमुखं कृत्वा कौतुकबंन्धनं कृत्वा पुण्याहं वाचयित्वा कुमारं भोजयित्वोपलेपनाद्यभ्युक्षणान्तं कृत्वा तत्रैकदेशं प्रणीय प्रज्वाल्य 'इमं स्तोमम्' इत्यादि ब्रह्मोपवेशनान्तं कृत्वा नवेनाधरवाससाऽऽच्छाद्य यज्ञोपवीतमजिनं चामन्त्रकं प्रतिमुच्याचमयित्वाऽऽत्मनो दक्षिणत उदगग्रेषु दर्भेषूपवेश्य परिस्तरणादि प्रपदान्तं कृत्वाऽऽरब्धे माणवके व्याहृतिभिस्तिसृभिर्हुत्वा पुनश्च समस्तान्ताभिश्च चतसृभिर्हुत्वा 'अग्ने व्रतपते' इत्यादिभिः पञ्चभिर्माणवकं हावयेत् मन्त्रलिङ्गात् । मन्त्रालिङ्गनिरीक्षणार्थमेव हि पञ्चभिरिति नोक्तम् ॥ ७ ॥

उत्तरतोऽग्नेः प्रत्यङ्मुखमवस्थाप्याञ्जलिं कारयेत्

अग्न्यात्मनोरन्तरेण माणवकं गमयित्वा प्रदक्षिणमावृतं दर्भेषु प्रत्यङ्मुखमवस्थाप्याकोशाञ्जलिं कारयेत् माणवकमाचार्यः ॥ ८ ॥

स्वयं चोपरि कुर्यात् ॥ ९ ॥

प्राङ्मुखो दर्भेषु स्थितः ॥ ९ ॥

दक्षिणतस्तिष्ठन्मन्त्रवान् ब्राह्मण आचार्यायोदकाञ्जलिं पूरयेत् ॥ १० ॥

आचार्यस्य दक्षिणत उदग्रेषु दर्भेषूदङ्मुखस्तिष्ठन् ब्राह्मणः 'ब्रह्मचर्यमागामुप मा नयस्व' इत्येतन्मन्त्रवित्। ऋत्विक्त्वात्सिद्धे ब्राह्मण इत्यन्यत्राप्यञ्जलिपूरणे ब्राह्मणनियमार्थं, यथा चन्द्रोपस्थाने ॥ १० ॥

आगन्त्रेति जपेत् प्रेक्षमाणे ॥ ११ ॥

अञ्जलिस्थमुदकं प्रेक्षमाणे माणवके जपेदाचार्यः। 'ब्रह्मचर्यमागामुप मा नयस्व' इति ब्राह्मणो ब्रह्मचारिणं वाचयेत् मन्त्रलिङ्गात् ॥ ११ ॥

को नामासीत्युक्तो देवताश्रयं नक्षत्राश्रयं वाऽभिवादनीयं नाम ब्रूयादसावस्मीति॥ १२॥

आचार्येणोक्तस्सन् देवताश्रयं स्वजन्मनक्षत्रं यद्देवत्यं तद्देवताश्रयं आग्नेय इतिवत्, नक्षत्राश्रयं स्वजन्मनक्षत्राश्रयं अश्वयुग्विष्णुशर्मानामास्मीतिवत् प्रतिब्रूयात् माणवकः। अभिवादनीयं गुह्यम्। अश्वयुक् अपभरणी कृत्तिकाः रोहिणी मृगशीर्षं आर्द्रा पुनर्वसू पुष्यः आश्रेषा मखाः फल्गुनी उत्तरफल्गुनी हस्तः चित्रा स्वाती विशाखे अनूराधाः ज्येष्ठा मूलं अषाढाः उत्तरापाढाः श्रवणं श्रविष्ठा शतभिषक् प्रोष्ठपदा उत्तरप्रोष्ठ-

पदा रेवती एतानि नक्षत्राणि। अश्विनौ यमः अग्निः प्रजापतिः सोमः रुद्रः अदितिः बृहस्पतिः सर्पाः पितरः अर्यमा भगः सविता इन्द्रः वायुः इन्द्राग्नी मित्रः इन्द्रः प्रजापतिः पितरो वा आपः विश्वेदेवाः विष्णुः वसवः इन्द्रः अजएकपात् अहिर्बुध्न्यः पूषा एतानि दैवतानि। आश्वयुजः आपभरणः कार्तिकेयः रौहिणेयः मार्गशीर्षः आर्द्रकः पौनर्वसुः पौषः आश्रेषः माघः फाल्गुनः औत्तरफाल्गुनः हस्तः चैत्रः स्वातिः वैशाखः अनूराधः ज्यैष्ठः मौलः आषाढः औत्तराषाढः श्रावणः श्रविष्ठः शातभिषजः प्रौष्ठपदः औत्तरप्रौष्ठपदः रैवतः इति नक्षत्राश्रयनिर्देशः। आश्विनः याम्यः आग्नेयः प्राजापत्यः सौम्यः रौद्रः आदित्यः बार्हस्पत्यः सार्पः पित्र्यः आर्यमणः भागः सावित्रः ऐन्द्रः वायव्यः ऐन्द्राग्नः मैत्रः ऐन्द्रः पित्र्यः आप्यः वैश्वदेवः वैष्णवः वासवः ऐन्द्रः अजएकपादः अहिर्बुध्न्यः पौष्णः इति देवताश्रयनिर्देशः॥ १२॥

उत्सृज्यापो देवस्य त इति दक्षिणोत्तराभ्यां हस्ताभ्यामञ्जलिं गृह्णीयादाचार्यः॥ १३॥

माणवकाञ्जलावुत्सृज्यासौशब्दे विष्णुशर्मन्निति वत् ब्रूयात्॥

सूर्यस्येति प्रदक्षिणमावर्तयेत्॥ १४॥

अञ्जलिं गृह्णन्नेव यावत्प्राङ्मुखः स्यात् तावदावर्तयेत्। असाविति पूर्ववत्॥ १४॥

दक्षिणमंसमन्ववमृश्यानन्तर्हितां नाभिमालभेत्प्राणानामिति॥ १५॥

अनन्तर्हितामेव पाणिभ्यां परितो गृह्णीयात् ॥ १५ ॥

अथैनं परिदद्यादन्तकप्रभृतिभिः ॥ १६ ॥

अनन्तर्हितमेव पाणिभ्यां परितो गृह्णीयात् । 'अन्तक इदं ते परिददाम्युदरम्' इत्युदरम्, 'अहुर इदं ते परिददाम्युरः' इत्युरः, 'कृशन इदं ते परिददामि कण्ठम्' इति कण्ठम् ॥१६॥

दक्षिणमंसं प्रजापतये त्वेति ॥ १७ ॥

दक्षिणेन पाणिना गृह्णीयादिति शेषः । इतः प्रभृत्यसौशब्दे विष्णुशर्मन्निति वन्माणवकनाम ब्रूयादाचार्यः ॥ १७ ॥

सव्येन सव्यं देवाय त्वेति ॥ १८ ॥

सव्येन पाणिना सव्यं गृह्णीयादित्यर्थः ॥ १८ ॥

ब्रह्मचार्यसीति ॥ १९ ॥

विष्णुशर्मन्निति वन्माणवकमुक्त्वा ॥ १९ ॥

संप्रेष्यापविश्य दक्षिणजान्वक्तमञ्जलिकृतं प्रदक्षिणं मुञ्जमेखलामाबध्नन्वाचयेदियं दुरुक्तादिति ॥ २० ॥

'समिधमाधेहि' इत्यादिभिश्चतुर्भिस्संप्रेष्योदगग्रेषु दर्भेषूपविष्टं नमस्काराञ्जलिकृतं त्रिवृत्कृतां मुञ्जमेखलां प्रदक्षिणं त्रिः परिवारयन्नाचार्यो माणवकं मन्त्रं वाचयेत् ॥ २० ॥

अधीहि भो इत्युपसादेत् ॥ २१ ॥

अग्नेः पश्चात् स्वस्थान आचार्य उपविष्टे पूर्ववत् प्रत्यागम्य दक्षिणेन पाणिना सव्यं पाणिमनङ्गुष्ठमुपसंगृह्य 'अधीहि भो' इति दक्षिणत उदग्ग्रेषु प्राङ्मुख उपविशेत्, आचार्याभिमुखे चक्षुर्मनसी कृत्वा प्राग्ग्रेषु वोदङ्मुखः। अयं विशेषः स्मृत्यन्तराद्गम्यते। आचार्यश्च तथा कारयेत्। तदेतदाचार्यस्य समीपनयनं उपनयनं उपनयनशब्दस्य प्रवृत्तिनिमित्तम्। अथोपरिष्टाद्धोमादि समापयेत्। नन्वेवं सति सावित्र्यध्यापनादेर्होमप्रयोगान्तर्भावो न स्यात्। नायं दोषः, 'उपनयीत तमध्यापयेत्' इति उपनयनोत्तरकालभावित्वश्रवणाद्ध्यापनस्य। ननु वेदाध्यापनं तत्रोक्तं, इह तु सावित्र्यध्यापनम्। नायं दोषः, सर्ववेदाध्यापनोपक्रमरूपत्वात्सावित्र्यध्यापनस्य। तथा हि—'सर्वेभ्यो वै वेदेभ्यस्सावित्र्यनूच्यत इति हि ब्राह्मणम्'। अपि च सर्ववेदात्मकत्वं सर्वसारत्वं च सावित्र्यादीनां श्रुतिस्मृतिषु श्रूयत एव। तथाहि—'त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्' इत्यादिभिः। अत उपरिष्टाद्धोमादि समाप्यैव सावित्र्यध्यापनम्॥ २१॥

अत ऊर्ध्वं सावित्र्यादेरध्यापनप्रकारमाह—

तस्मा अन्वाह सावित्रीं पच्छोऽर्धर्चशस्सर्वामिति॥ २२॥

पादेपादेऽवसायाध्यापयीत, ततः पादद्वयेऽवसाय, ततस्सर्वां संहत्य॥ २२॥

महाव्याहृतीश्चैकैकशः॥ २३॥

भूर्भुवस्स्वरिति प्रत्येकमवसाय॥ २३॥

ओंकारं च ॥ २४ ॥

ओमिति चाध्यापयीत ॥ २४ ॥

प्रयच्छत्यस्मै वार्क्षं दण्डम् ॥ २५ ॥

स्मृत्युक्तं दण्डं प्रयच्छेदाचार्यः ॥ २५ ॥

सुश्रवस्सुश्रवसं मेति ॥ २६ ॥

प्रतिगृह्णीयादिति शेषः ॥ २६ ॥

समिधमादध्यादग्नये समिधमिति ॥ २७ ॥

याज्ञियां समिधं तस्मिन्नेवाग्नावादध्यान्माणवकः । औपासनवदुभयतः परिषेचनम् ॥ २७ ॥

भैक्षं चरेत् ॥ २८ ॥

भवति भिक्षां देहीति ब्राह्मणः । भिक्षां भवति देहीति क्षत्रियः । भिक्षां देहि भवतीति वैश्यः । दण्डहस्त आदित्यमुपस्थायाग्निं प्रदक्षिणीकृत्य भैक्षं याचेत ॥ २८ ॥

मातरमग्रे ॥ २९ ॥

प्रथमं मातरं याचेत ॥ २९ ॥

अथान्यास्सुहृदः ॥ ३० ॥

सुहृद इति स्त्रीपुंसयोस्साधारण्यात् स्त्रीनियमार्थमन्या इति विशिनष्टि ॥ ३० ॥

आचार्याय भैक्षं निवेदयेत् ॥ ३१ ॥

भैक्षमिदमुपयुज्यतामिति ब्रूयात् । आचार्योऽपि गृह्णीयात् प्रतिप्रयच्छेद्वा यथारुचि । उपनयनं वेदाध्ययनाङ्गं पुरुषसंस्कारद्वारेण तद्धर्ममेव क्रियमाणमपेक्षते 'अध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्च द्विजातीनाम्' इत्यधिकृत्य विधानादुपनयनाच्च द्विजातित्वसिद्धेः । अत उपनयनरहितानां तेष्वनधिकारः । न केवलं वैधत्वं किं तु निषेधात्प्रत्यवायश्च ॥३१॥

तिष्ठेदाऽस्तमयात्तूष्णीं ॥ ३२ ॥ त्रिरात्रं क्षारलवणदुग्धमिति वर्जयेत् ॥ ३३ ॥

स्पष्टे सूत्रे ॥ ३२-३३ ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
द्वितीयस्य पटलस्य
चतुर्थः खण्डः.

गोदाने चौलवत्कल्पः ॥ १ ॥

अष्टौ व्रतानि स्मर्यन्ते छन्दोगानां—उपनयनं गोदानं व्रातिकमादित्यव्रतं माहानाम्निकमौपनिषदं भौतिकं ब्रह्मसामव्रतमिति । तेषामुपाकरणविसर्गौ च स्मर्येते । तत्रोपनयनं कृत्स्नाध्ययनार्थमपि सत् व्रतान्तरनिरपेक्षं सावित्र्यध्ययने तत्सामाध्ययने च उपकरोतीति व्रतान्तरत्वेन व्यपदिश्यते । निरपेक्षकारस्य च विसर्गः क्रियते उपनीतं वक्ष्यमाणान्यधश्शय्यादीनि स्मृत्युक्तानि च नियमानि समाचरन्तं सावित्रीं तत्साम चाध्याप्य यथाश्रद्धे काले गते हविष्यमेकभुक्तं भोजयित्वा प्रागुदयात्प्राङ्गो-

दङ्क्त्वा ग्रामान्निष्क्रम्य कमण्डलुनोदकं गृहीत्वा प्रागुदक्प्रवणे देशे गोमयेनोपलिप्य कुशैः प्रदक्षिणं मण्डलं कृत्वादिते तेनोदकेनाचम्य दर्भमुष्टिं गृहीत्वा ब्रह्मीभूतो वामदेव्येन मण्डलं प्रविशेदाचार्यः । शिष्यश्च तमन्वारभ्य तथा प्रविशेत् पुनराचम्य प्रपदान्तं कृत्वाऽन्वारब्धे व्याहृतिभिः हुत्वा 'इन्द्राय बृहद्भानवे स्वाहा, प्रजापतये मनवे स्वाहा' इत्याघारावाघार्याज्यभागौ हुत्वा 'अग्नये स्वाहा सोमाय स्वाहा रुद्राय स्वाहेन्द्राय स्वाहा ब्रह्मणे स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यस्स्वाहा ऋषिभ्यस्स्वाहा ऋग्भ्यस्स्वाहा यजुर्भ्यस्स्वाहा सामभ्यस्स्वाहा श्रद्धायै स्वाहा प्रज्ञायै स्वाहा मेधायै स्वाहा सावित्र्यै स्वाहा सदसस्पतये स्वाहाऽनुमतये स्वाहा' इति च हुत्वा होमं समाप्य कुशेष्वासीनो दक्षिणेन पाणिना कुशमुष्टिं धारयन् यथाविधं वक्ष्यमाणं तथाविधं श्रावयेत् ओंपूर्वा व्याहृतीः सावित्रीं चतुरनुष्टुप्य मनसा साम सावित्रीं च 'सोमं राजानं ब्रह्मजज्ञानम्' इति द्वे पञ्चनिधनं वामदेव्यं वैरूपं वाचोव्रते द्वे भद्रश्रेयसी च पूर्वं गीत्वा माणवकं गायत्रं श्रावयेत् । अथोपरिष्टात्सप्त महासामकल्मापवामदेव्यानि गीत्वा पुनरेकदेशं प्रणीयानुप्रवचनीयहोमः—प्रपदान्तं कृत्वाऽन्वारब्धे व्याहृतिभिर्हुत्वा पुनश्च समस्तान्ताभिश्चतसृभिर्हुत्वा 'अग्ने व्रतपते' इत्यादिभिः पञ्चभिर्ब्रह्मचारिणं हावयेत् । 'उपनयनव्रतमचारिषं तत्ते प्रावोचं तदशकं तेनारात्समिदमहमनृतात्सत्यमुपागाम्' इति मन्त्रविकारः । ऋचं साम सदसस्पतिमिति चाज्यं जुहुयात् । उपरिष्टाद्धोमादि दक्षिणान्तं कृत्वा ततो वामदेव्येन क्रमशो निष्क्रमणं, ततो ब्राह्मणभोजनम् ॥

अथ गोदानोपाकरणं—तत्र चौलवत् केशकृन्तिः वपनमित्यर्थः । वपनाङ्गत्वान्नापितादिरप्यतिदिश्यते, कृसरस्थालीपाकः माता त्र्यायुषमिति च त्रयं निवर्तते अतदर्थत्वात् । होमस्त्वस्ति—'एवं चौलोपनयनगोदानेषु' इति वचनात् । समस्ताभिर्व्याहृतिभिः होमः कर्तव्यः ॥ ११ ॥

सलोमं वापयेत् ॥ २ ॥

स्पष्टम् ॥ २ ॥

गोअश्वाविमिथुनानि दक्षिणाः पृथग्वर्णानाम्॥

गोमिथुनमश्वमिथुनमविमिथुनं च यथाक्रमं ब्राह्मणादीनां गोस्थाने स्यात् ॥ ३ ॥

सर्वेषां वा गौः ॥ ४ ॥

स्पष्टम् ॥ ४ ॥

अजः केशप्रतिग्रहाय ॥ ५ ॥

यः केशान् निखनेत् तस्मै देयः ॥ ५ ॥

उक्तमुपनयनम् ॥ ६ ॥

चौलवद्व्रपनान्तं कृत्वा पुनरेकदेशं प्रणीय उपनयनवत्कृत्स्नं कुर्यात् । 'गोदानव्रतं चरिष्यामि' इति मन्त्रविकारः । समीपनयनस्याध्यापनार्थत्वात् सावित्र्यध्ययनमपि तद्वदेव कुर्यात्। व्रदुपनयनं गोदानाद्यपि तदेवोक्तमिति सूत्रयोजना ॥ ६ ॥

नाचरिष्यन्तं संवत्सरम् ॥ ७ ॥

यस्य संवत्सरं चरिष्यामीति बुद्धिस्तमेवेदं ग्राहयेत् । यस्य तु न चरिष्यामीति बुद्धिस्तं न ग्राहयेदित्यर्थः । तमपि केनाप्युपायेन तथाबुद्धिमुत्पाद्य ग्राहयेदेव ॥ ७ ॥

अनियुक्तं त्वहतम् ॥ ८ ॥

अनियुक्तमनियतं, तुशब्दोऽवधारणार्थः । अहतमेवानियतं, सूत्रचर्ममेखलादण्डा नियता एव । असत्यवधारणे कृतकार्यतया तेषामपि निवृत्तिराशङ्क्येत, अतः पुराणानि त्यक्त्वा नवानि गृह्णीयात् ॥ ८ ॥

तथाऽलङ्कारः ॥ ९ ॥

अनियत इत्यर्थः ॥ ९ ॥

अथ व्रतिनो नियमा उच्यन्ते--

अधस्संवेशी ॥ १० ॥

खट्वादिनिषेधकः ॥ १० ॥

अमधुमांसाशी स्यात् ॥ ११ ॥

स्पष्टम् ॥ ११ ॥

मैथुनक्षुरकृत्यस्नानावलेखनदन्तधावनपादधावनानि वर्जयेत् ॥ १२ ॥

क्षुरकृत्यनिषेधो नोपरिच्छेदनस्य । दृष्टार्थस्य स्नानस्य निषेधो न विहितस्य । अवलेखनं स्पृश्यमलापकर्षणम् । पादधावनं नखकृन्तनादि ॥ १२ ॥

नास्य कामे रेतस्स्कन्देत् ॥ १३ ॥

कामे निमित्ते रेतस्स्कन्दनं न कुर्यात् । अनेनैव सिद्धे मैथुननिषेधो दोषभूयस्त्वसूचनार्थः ॥

न गोयुक्तमारोहेत् ॥ १४ ॥

गवा युक्तं रथादि ॥

न ग्राम उपानहौ ॥ १५ ॥

उपानहौ ग्रामे वर्जयेत्, न बहिर्निषेधः । एषु सूत्रेष्वधिकवचनानि सजातीयस्मृत्युक्तोपसंग्रहणार्थानि ॥

मेखलाधारणभैक्षचर्यदण्डसमिदाधानोपस्पर्शनप्रातरभिवादा नित्यम् ॥ १६ ॥

धारणग्रहणं वस्त्रसूत्रचर्मणामुपसंग्रहणार्थम् । भैक्षचर्यमुक्तेन प्रकारेण । चर्यग्रहणं सायंप्रातर्भैक्षभोजनार्थम् । दण्डेत्यस्यानन्तरं धारणशब्दोऽध्याहर्तव्यः । विनष्टानप्सु प्रास्यान्यान्मन्त्रेण गृह्णीयात् ।

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥

इति मनुवचनाच्च । समिदाधानं 'देव सवितः प्रसुव' इति लौकिकेऽग्नौ परिचरणतन्त्रेण सायं प्रातश्च । आधानग्रहणं व्याहृतिभिश्च समस्तान्ताभिस्समिदाधानार्थम् । याज्ञिया एव समिधः । उपस्पर्शनं स्नानम् । प्रातरभिवादो गुरूणां कर्णसमौ बाहू उद्धृत्य व्यत्यस्तेन पाणिना दक्षिणेन दक्षिणं पादं

गृह्णीयात् सव्येन च सव्यम् । अभिवादये विष्णुशर्मनामाहमस्मि भो इतिवद्यथानाम । नित्यमिति समाप्तेष्वपि व्रतेष्वास्नानादनुवृत्त्यर्थम् । एते सर्वव्रतसाधारणाः 'अनियुक्तम्' इत्यारभ्योक्ताः ॥

गोदानव्रातिकादित्यव्रतौपनिषदज्येष्ठसामिकास्संवत्सराः ॥ १७ ॥

संवत्सरं च कर्तव्या इत्यर्थः ॥

नादित्यव्रतमेकेषाम् ॥ १८ ॥

एकेषां शाखिनामादित्यव्रत नास्ति येषां शुक्रियपाठो न विद्यत इत्यर्थः । अपरा व्याख्या—एकेषामाचार्याणां मतेन सर्वेषामेव शाखिनामादित्यव्रत नास्तीति ॥

ये चरन्त्येकवाससो भवन्ति ॥ १९ ॥

न वाससां परिवर्तनं कुर्युः ॥

आदित्यं च नान्तर्दधते ॥ २० ॥

छायागमननिषेधोऽयम् ॥

न चापोऽभ्युपयन्ति ॥ २१ ॥

स्नानार्थमपि नावगाहनं कुर्युः ॥

शक्करीणां द्वादश नव षड्त्रय इति विकल्पाः ॥

संवत्सरा इति वर्तते । विकल्पा इति विविधा एते कल्पाः न तुल्या इत्यर्थः । अनेन कालभूयस्त्वया फलभूयस्त्वं द्योत्यते ॥

अथ महानाम्नीव्रतिनो नियममाह—

कृष्णवस्त्रः ॥ २३ ॥

कृष्णस्तु वर्णविशेषः, आर्द्रवस्त्रता वा ॥

कृष्णभक्षः ॥ २४ ॥

नीरसाहारः अपक्काहारो वा ॥

आचार्याधीनः ॥ २५ ॥

असत्यप्यध्ययने तत्प्रियकारी स्यात् ॥

तिष्ठेद्दिवा ॥ आसीत नक्तम् ॥ २६—२७ ॥

स्पष्टे ॥

संवत्सरमेकेषां पूर्वैः श्रुताश्चेत् ॥ २८ ॥

यस्य पित्रादिभस्त्रचवरैश्शक्यो ऽधीताः स संवत्सरं चरेदित्येके मन्यन्ते ॥

उपोषिताय परिणद्धाक्षायानुगापयेत् ॥ २९ ॥

'व्यत्ययो बहुलम्' इति द्वितीयास्थाने तादर्थ्यवाचिचतुर्थी कृता तदर्थानां धर्माणां बाहुल्यं सूचयितुम् । ते च धर्मा निदानकारेणोक्ताः आचारसिद्धाश्च वेदितव्याः । तान् वक्ष्यामः। महानाम्न्यध्ययनकाले आचार्याशिष्ययोर्हस्तेनोदकधारणम्, एको वा द्वौ वा गायेतां न बहवः, सकृदृचमुक्त्वा साम च सकृदेव पुरीषपदमुक्त्वा पुनः पादशः सकृद्गायात्, नावर्तयेदेकस्मिन् दिने । व्रतचरणकाले सायंप्रातस्स्नानं, वर्षति चरणं नातीयात् । नात्रोपेक्षा कर्तव्या कृत्स्नवेदतुल्यत्वात् अस्य साम्नः ।

व्रतचरणकाले पूर्णेऽहोरात्रं वाग्यत उपवसेत् । प्रागस्तमयाद्-हतेन वाससा चक्षुषी पिधाय रात्रावासीत । अथ परेद्युरुपोषितं परिणद्धाक्षं वाग्यतमुपनयनवच्छेषःपर्यन्तं गीत्वा शक्करीर्गापयेत् श्रावयेद्वा श्रावणविधिवचनात् । अनु सादृश्यार्थः । अध्ययनकालवदुदकधारणमृग्जपश्चेत्यर्थः । प्रतिस्तोत्रीयं पुरीषपदाभ्यासो विशेषः ॥

यथा मा न प्रधक्ष्यतीति तं प्रातरभिवीक्षयन्ति यान्यप्रधक्षन्तं मन्यन्तेऽपोऽग्निं वत्समादित्यम् ॥ ३० ॥

शक्करीगानानन्तरं यथा वीक्षणे कृते मां दग्धुं न शक्ष्यति माणवक इत्याचार्यो मन्यते तथा तं वीक्षयेत् प्रातःकाले । अभीत्यनन्यवीक्षणार्थम् । बहुवचनं गुरुत्वात्पूजार्थम् । यानि दग्धुमशक्तं मन्यन्ते तानि वीक्षयेत् । कानि पुनस्तानि? अवादीनि ॥

तेषां वीक्षणमन्त्रान् क्रमश आह—

अपोऽभिव्यख्यमित्यपो ज्योतिरभिव्यख्यमित्यग्निं पशूनभिव्यख्यमिति वत्सं सुराभिव्यख्यमित्यादित्यं विसृजेद्वाचम् ॥ ३१ ॥

वाग्यमननियमं त्यजेत् नावश्यं भाषेत ॥

गौर्दक्षिणा ॥ ३२ ॥

वीक्षिता गौराचार्याय देया माणवकेन ॥

कंसो वासो रुक्मश्च ॥ ३३ ॥

कंसपूर्णा आपः तत्र रुक्मं निधाय वीक्षेत, तं कंसं रुक्मं च विधानार्थं च वस्त्रमाचार्याय दद्यात् ॥

अनुप्रवचनीयेष्वृचं साम सदसस्पतिमिति चाज्यं जुहुयात् ॥ ३४ ॥

प्रवचनात् पश्चात् क्रियत इत्यनुप्रवचनीयहोमः । चकारस्समुच्चयार्थः । उपनयनविसर्गेऽस्माभिरुक्तानाम् । आज्यमिति प्रतिनिधिवर्जनार्थं, अलाभेऽपि कालोत्कर्ष एवेति । संहिताश्रवणरहस्यविधयो गृह्यविशेषाद्द्रष्टव्याः । सर्वानुसारेणास्माभिरुपनयनमुक्तम् । अथोक्तेन प्रकारेण गोदानव्रतमुपाकृत्य तस्मिन् संवत्सरे, 'अग्न आयाहि' इत्यादि, 'वर्मीव धृष्ण वारुज' इत्यन्तमृचमध्याप्य 'ओम्रायी' इत्यादीनि चाग्नेयैन्द्रपावमानानि पर्वाण्यध्यापयीत । पूर्णे संवत्सरे उपनयनविसर्गवद्विसर्गं कुर्यात् । नात्र प्रागुदयात् गमननियमः वामदेव्येन प्रवेशनिष्क्रमणे । वामदेव्यादीनि श्रेयोऽन्तानि सप्तहादीनि कलमाषान्तानि च निवर्तन्ते । गायत्रस्य स्थाने आग्नेयैन्द्रपावमानानि पर्वाणि श्रावयेत् । अशक्तश्चेत् पर्वाद्यन्तानि सामानि, 'सोमं राजानम्', 'इत एत उदारुहन्', 'स पूर्व्यो महो नाम्', 'अभित्रिपृष्ठम्' इति च श्रावयेत् । अनुप्रवचनीये गोदानव्रतमचारिषमिति मन्त्रविकारः । अथ व्रातिकमुपनयनवत्सर्वं कुर्यात् । व्रातिकमिति मन्त्रविकारः । तस्मिन् संवत्सरे, 'इन्द्रज्येष्ठं न आभर' इत्यादि, 'सुप्रपाण इहस्ते' इत्यन्तमृचमध्याप्यार्कद्वन्द्वव्रताने छान्दसानि त्रीणि पर्वाण्यध्यापयीत । आदित्यव्रताभावपक्षे श्रुक्रीयमपि पूर्णे संवत्सरे उपनयनविसर्गवद्विसर्गं कुर्यात् । गायत्रस्य स्थाने छान्दसानि पर्वा-

णि श्रावयेत् अशक्तौ गोदानव्रतवत् । व्रातिकादित्यव्रतमहानाम्निकौपनिषदेषु नास्ति संहिताहोम इति केचित् । श्रावणवत्पूर्वो होमस्संहिताध्ययनार्थत्वात् संहिताहोम इत्युच्यते । इमं होमं हुत्वाऽऽग्नेयादीनां पर्वणां चाध्ययनं संहिताध्ययनमित्युच्यते। व्रातिकव्रतानन्तरमादित्यव्रतं, तस्य व्रातिकवदुपाकरणम् । तस्मिन् संवत्सरे शुक्रियाध्ययनं तद्विभिस्सह । उपनयनविसर्गवद्विसर्गं कुर्यात् । गायत्रस्य स्थाने शुक्रियाणि । अशक्तौ पूर्ववत् 'आदित्यव्रतम्' इति मन्त्रविकारः । अथ महानाम्निकस्योपनयनवदुपाकरणविसर्गौ । 'महानाम्निकव्रतम्' इति मन्त्रविकारः । गायत्रस्य स्थाने शक्वर्यः । शेषमुक्तम् । अथोपनयनवदौपनिषदव्रतम् । 'उपनिषद्व्रतम्' इति मन्त्रविकारः । गायत्रस्य स्थाने 'देव सवितः' इत्यादि 'न च पुनरावर्तते' इत्येवमन्तं स्यात् । कृत्स्नश्रवणाशक्तौ यजुरोंकारादित्यप्राणानामाद्यन्तानि वाक्यानि सोमं राजानोने च श्रावयेत् । अथ ज्येष्ठसामव्रतमुपनयनवत्सर्वम् । 'ज्येष्ठसामव्रतम्' इति मन्त्रविकारः 'भौतिकव्रतम्' इति वा । गायत्रस्य स्थाने आज्यदोहादित्रयम् । अथ ब्रह्मसामव्रतमेधम् । रुच्या चरणकालनियमः । 'ब्रह्मसामव्रतम्' इति मन्त्रविकारो गायत्रस्य स्थाने तवश्यावीयम् । 'ऊर्क्' इत्यादिः 'हिंवम्' इत्यन्तं तवश्यावीयमिति केचित् ॥ इलान्दं पञ्चानुगानामिति केचित् । शाखान्तरस्थमित्यन्ये । गोदानादीनि चत्वार्येव व्रतानि चत्वारि वेदव्रतानि' इति गौतमवचनात् । आदित्यव्रताभावपक्षे औपनिषदसंहितानि चत्वारि स्युः । व्रतचतुष्टयपक्षे तूपनयनं सर्वार्थत्वान्न गण्यते व्रतत्वेन । व्रतापेक्षाणां वेदभागानां व्रतकालेऽध्ययनाशक्तौ व्रतकालोत्कर्षः कार्यः । समाप्य वा व्रतनियतकालमधीयीत । इतरस्य तु वेदभागस्य न कालनियमः तथा वेदाङ्गानाम् ॥

अथ प्रकृतमनुसरामः—

चित्ययूपोपस्पर्शनकर्णक्रोशाक्षिवेपनेषु सूर्याभ्युदितस्सूर्याभिनिर्मुक्त इन्द्रियैश्च पापस्पर्शैः पुनर्मामित्येताभ्यामाहुतिं जुहुयात् ॥३५॥

यूपाग्निचयनयोः कर्मापवर्गादूर्ध्वमुपस्पर्शने दोषोस्तीति तन्निर्हरणार्थमिदं, श्रोत्रे शब्दिते वामचक्षुःकम्पे च दुर्निमित्तत्वात्तन्निर्हरणार्थं, स्वपन्तं सूर्योऽभ्युदयादस्तमियाद्वा तत्र दोषनिर्हरणार्थं, मनसा निषिद्धे चिन्तित चक्षुषा निषिद्धे दृष्टे श्रोत्रेण निषिद्धे श्रुते घ्राणेन निषिद्धे आघ्राते वाचा निषिद्धे भाषिते एवमिन्द्रियैः पापकृद्भिर्युक्तस्तद्दोषनिर्हरणार्थं जुहुयात् आज्यतन्त्रेण, पोरश्चरणतन्त्रेण वा। 'पुनर्मनः' इति द्वितीयमन्त्रादिः॥

आज्यलिप्ते वा समिधौ ॥ ३६ ॥

समित्तन्त्रेण ॥

जपेद्वा लघुषु जपेद्वा लघुषु ॥ ३७ ॥

अल्पेषु पापेषु। द्विरुक्तिरादरार्था। पटलसमाप्त्यर्था वा ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
द्वितीयस्य पटलस्य पञ्चमः खण्डः.

समाप्तश्च द्वितीयः पटलः.

आप्लवने पुरस्तादाचार्यकुलस्य परिवृत आस्ते॥

'तयोराप्लवनं पूर्वम्' इत्युक्तमिदानीं पुरुषस्योच्यते। आप्लवनं स्नानम्। अत्र कर्त्रन्तरानिर्देशेन स्वयमेव सर्वं कुर्यात्। आचार्यगृहस्याग्रे भागे प्रावृते देशे उदगग्रेषूपविशेत्॥

उदङ्मुख आचार्यः प्रागग्रेषु ॥ २ ॥

तस्य दक्षिणत उपविशेत्॥

एवं ब्रह्मवर्चसकामः ॥ ३ ॥

नित्ये कामोपबन्धोऽयम्॥

गोष्ठे पशुकामः ॥ ४ ॥

स्पष्टम्॥

सभायां यशस्कामः ॥ ५ ॥

ब्रह्मस्थाने॥

सर्वौषधेनापः फाणयेत् ॥ ६ ॥

सर्वैरोषधिफलैर्यथालाभं संयोज्याग्निनाऽपः फाणयेत् तापयेत् यः कश्चित्॥

सुरभिभिश्च ॥ ७ ॥

सुगन्धिभिश्च संयोजयेदपः॥

ताभिरशीतोष्णाभिराचार्योऽभिषिञ्चेत् ॥ ८ ॥

तप्ताभिश्शीतोदकसंयुक्ताभिश्शिष्यमूर्धन्यवसिञ्चेद्वक्ष्यमाणप्रकारेण ॥

स्वयं वा मन्त्राभिवादात् ॥ ९ ॥

मामिति मन्त्रलिङ्गात् ॥

उभावित्येके तेनेममित्याचार्यो ब्रूयात् ॥१०॥

'तेनाहं मामभिषिञ्चामे' इत्यत्र 'तेनेममभिषिञ्चामि' इति ॥

ये अप्स्वित्यपामञ्जलिमवसिञ्चेत् ॥ ११ ॥

उपनयनवदन्यः पूरयेत् भूमाववाञ्चं सिञ्चेदभिषेक्ता ॥

यदपामिति च ॥ तूष्णीं च ॥ १२–१३ ॥

स्पष्टे ॥

यो रोचन इति गृह्यात्मानमभिषिञ्चेत् ॥१४॥

पूर्ववदञ्जलिना पूर्णं गृहीत्वा । गृह्येत्यसमासेऽपि बहुलवचनात् ल्यप् कृतोऽस्य बहुविषयत्वं द्योतयितुम् । अतो गृहीत्वा गृहीत्वाऽभिषेकः । आत्मानमिति शिष्योपलक्षणार्थं, अत्राचार्योऽपि शिष्यमेवाभिषिञ्चेत् ॥

येन स्त्रियमिति च ॥ तूष्णीं च ॥१५–१६॥

स्पष्टे ॥

उद्यन्नित्यादित्यमुपतिष्ठेत् ॥ १७ ॥

अनार्द्रेण वस्त्रेण परिधायाचम्योदगग्रेषु स्थित उपातिष्ठेच्छिष्यः ॥

समस्येद्वा ॥ १८ ॥

'प्रातर्यावभिरस्थात् सान्तपनेभिरस्थात् सायंयावभिरस्थात् दशसनिरसि शतसनिरसि सहस्रसनिरसि दशसनिं मा कुरु शतसनिं मा कुरु सहस्रसनिं मा कुरु' इति समासः ॥

विहरन्ननुसंहरेच्चक्षुरसीति ॥ १९ ॥

यथापाठं ब्रुवन् 'आविश' इत्येषामनन्तरं 'चक्षुरसि' इत्यादि त्रिरनुषज्य ब्रूयात् ॥

उदुत्तममिति मेखलामवमुञ्चेत् ॥ २० ॥ प्राश्य वापयेच्छिखावर्जं केशश्मश्रुलोमनखानि ॥

स्पष्टे ॥

अलंकृतोऽहतवाससा श्रीरिति स्रजं प्रतिमुञ्चेत् ॥ २२ ॥

द्वे नववस्त्रे परिधाय स्रजं वलयाकृतिं कृत्वा शिरसि प्रतिमुञ्चेत् ॥

नेत्रयौ स्थ इत्युपानहौ ॥ २३ ॥

पादयोः प्रतिमुञ्चेत् ॥

वैणवं दण्डमादध्यात् गन्धर्वोऽसीति ॥ २४ ॥

स्मृत्युक्तलक्षणं दण्डं गृह्णीयादित्यर्थः ॥

उपेत्याचार्यं परिषदं प्रेक्षेद्यक्षामिवेति ॥ २५ ॥

आचार्यसमीपं गत्वा संसदं पश्येन्मन्त्रेण ॥

उपविश्यौष्ठापिधानेति मुख्यान् प्राणानभिमृशेत् ॥ २६ ॥

दर्भेषूपविश्य चक्षुषी श्रोत्रे नासिके चाभिमृशेन्मन्त्रेण ॥

गोयुक्तं रथमालभेत् वनस्पत इति ॥ आस्थाता त इत्यारोहेत् ॥ प्राचीं प्रयायोदीचीं वा प्रदक्षिणमावर्तयेत् ॥ २७–२९ ॥

स्पष्टानि ॥

प्रत्यागतायार्घ्यमित्येके ॥ ३० ॥

प्रत्यागताय मधुपर्कं दद्यादाचार्यः ॥

उक्तमाप्लवनं, अत ऊर्ध्वं स्नातकस्य कृतविवाहस्याकृतविवाहस्य च साधारणधर्मानाह—

वृद्धशीली स्यादत ऊर्ध्वम् ॥ ३१ ॥

दर्पादिपरिवर्जक इत्यर्थः ॥

नाजातलोम्योपहासमिच्छेत् ॥ ३२ ॥

विवाहादूर्ध्वं मैथुनप्रसक्तौ अजातलोम्या असमर्थया मैथुनं तदर्थां चेष्टां च न कुर्यादित्यर्थः ॥

नायुग्व्या ॥ ३३ ॥

अस्वास्थ्येनाशक्तयादिनाऽयोग्ययोपहासं नेच्छेत् पीडाहेतुत्वात् तस्याः ॥

न रजस्वलया ॥ ३४ ॥

स्वभार्यया आस्नानात् ॥

न समानर्ष्या ॥ ३५ ॥

समानार्षेययाऽर्थाद्विवाहस्यापि प्रतिषेधः ॥

अपरया द्वारा प्रपन्नद्विःपक्वपर्युषितानि नाश्नीयात् ॥ ३६ ॥

यच्च कुद्दारप्रवेशितं यच्च योग्यमेव द्रव्यं पक्वमेव पुनः पच्यते । व्रीहिमूलफलादेस्तु संस्कारार्थं द्विपक्वस्याप्रतिषेधः । यच्च पक्वमुषःकालमत्येति तन्न भुञ्जीत ॥

अन्यत्र शाकमांसयवपिष्टविकारेभ्यः ॥ ३७ ॥

द्विःपक्वपर्युषितयोरभ्यनुज्ञा ॥

पायसाच्च ॥ ३८ ॥

अन्यत्रेत्यनुवर्तते । चकारः पयोविकाराणां च संग्रहार्थः ॥

फलप्रचयनोदपानावेक्षणवर्षातिधावनोपानत्स्वयंहरणानि न कुर्यात् ॥ ३९ ॥

उत्पत्तिस्थाने प्रकीर्णानां फलानां सङ्गीकरणं प्रचयनम् । कूपादाववाङ्मुखानिरीक्षणम् । वर्षति सति तद्देशाद्धावनम् । स्वयोरुपानहोर्हस्तादिना धारणम् । रज्ज्वादिव्यवधाने न दोषः ॥

नागन्धां स्रजं धारयन्न चेद्धिरण्यस्रक् ॥ ४० ॥

स्पष्टम् ॥

भद्रमिति न वृथा व्याहरेत् ॥ ४१ ॥

भद्रमित्यकारणान्न वदेत् । उक्ता नियमाः ॥

पुष्टिकामो गाः प्रकालयेतेमा म इति ॥४२॥

पशुवृद्धिकामः प्रातर्गृहान्निर्गमयेत् ॥

प्रत्यागता इमा मधुमतीरिति ॥ ४३ ॥

सायं प्रत्यागता अभिमन्त्रयेतेत्ययमेकः कल्पः ॥

अथापरः—

पुष्टिकाम एव प्रथमजातस्य वत्सस्य प्राङ्मातुः प्रलेहनाल्ललाटमुल्लिह्य निगिरेत् गवामिति

संवत्सरे पूर्वं जातस्य ॥

संप्रजातासु गोष्ठे निशायां विलयनं जुहुयात् संग्रहणेति ॥ ४५ ॥

सर्वासु संप्रजातासु सायमाहुत्यनन्तरमाज्यतन्त्रेण । अयमप्येकः कल्पः ॥

अथापरः पुष्टिकामस्यैव—

अथापरं वत्समिथुनयोः कर्णे लक्षणं कुर्यात् भुवनमिति ॥ ४६ ॥

पुंसः स्त्रियाश्च कर्णेषु चिह्नार्थं छेदनं कुर्यात्स्वधितिना ॥

पुंसोऽग्रे ॥ ४७ ॥

प्रथममित्यर्थः ॥

लोहितेनेत्यनुमन्त्रयेत ॥ ४८ ॥

तूष्णीमन्यासामपि लक्षणं कृत्वा सर्वा एवानुमन्त्रयेत ॥

तन्तीं प्रसारितामियं तन्तीति ॥ ४९ ॥

निर्गतासु गोषु बन्धनार्थरज्जुमभिमन्त्रयेत । अयपप्येकः कल्पः । एते कल्पा अहरहराफलसिद्धेः कार्याः ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
तृतीयस्य पटलस्य
प्रथमः खण्डः

श्रावण्यां पौर्णमास्यां गृह्यादाग्निमतिप्रणीय प्रतिदिशमुपलिम्पेदधिके प्रक्रमे ॥ १॥

श्रावण्यामित्येव सिद्धे पौर्णमास्यामिति अन्यत्रापि श्रावणीग्रहणे पौर्णमास्यर्थं 'श्रावणीमित्येके' इत्यत्र । इतरथा हस्ते स्यात् प्रकृतत्वात् । उपवसथ्येऽहनि पूर्वाह्णे पञ्चदश्यामेतत्कुर्यात् । यदि पूर्वाह्णे पञ्चदशी न विद्यते यजनीयेऽहनीदं कृत्वा पौर्णमासं कुर्यात् । एवमुत्तरेष्वपि कर्मसु निर्वापशून्यांस्तण्डुलान् गृह्येऽग्नौ भर्जितात् कृत्वाऽर्धे निधायार्धे सक्तून् कृत्वा ओप्य शूर्पे अग्नेरुत्तरतो दर्भेषु शूर्पमुदकपूर्णं पात्रमन्यच्चोदकपात्रं दर्वीं

दर्भस्तम्बं च निधाय गृह्याग्नेः पुरस्तात् द्विपदमतीत्याग्नेर्दक्षिणतो गत्वाऽभ्युक्षणान्तं कृत्वा गृह्याग्नेरेकदेशं प्रणीय तत्र निधाय तस्य प्रतिदिशमेकमेकं पदमतीत्य प्रागुपक्रमं प्रदक्षिणं गोमयेनोपलिम्पेत् ॥

सकृद्गृहीतान् सक्तून् दर्व्यां कृत्वा पूर्वोपलिप्ते निनीयापो यः प्राच्यामिति बलिं निवपेत् ॥ २ ॥

दक्षिणपश्चिमयोरुपलिप्तस्थानयोरन्तरोपविश्य पूर्णपात्रात्पात्रान्तरे किंचिदुदकं निनीय तदर्धं पूर्वस्मिन्नुपलिप्तस्थाने पाणिनाऽऽसिच्य तेनैव पाणिना दर्व्यां सक्तून् निधाय उपलिप्तस्थाने दर्व्यां मन्त्रेण सक्तून्निदध्यात् ॥

निनयेदपां शेषम् ॥ ३ ॥

शिष्टमर्धमपाम् ॥

अप उपस्पृश्यैवं प्रतिदिशं यथालिङ्गम्॥ ४ ॥

पाणी प्रक्षाल्य यथालिङ्गं मन्त्राः ॥

दक्षिणपश्चिम अन्तरेणाग्निं च संचरः ॥ ५॥

दक्षिणस्योपलिप्तस्याग्नेश्चान्तरेण पाणी प्रसार्य पूर्वे कुर्यात्। पश्चिमस्याग्नेश्चान्तरेणोत्तरे कुर्यात् । अनतिप्रणीतस्योत्तरत एव द्रव्याणि स्युः । तद्देशाद्यावदर्थमेवोपादायोपादाय बलिकर्म ॥

शूर्पेण शिष्टानग्नावोप्यातिप्रणीतादनतिप्रणीतस्यार्धं गत्वा न्यञ्चौ पाणी कृत्वा नमः पृथिव्या इति जपेत् ॥ ६ ॥

सर्वान् सक्तूनतिप्रणीतेऽग्नावोप्यानतिप्रणीतस्य पश्चात् स्वस्थानं गत्वोपविश्यावाञ्चौ पाणी भूमौ निधाय जपेत् ॥

तत उत्थाय सोमो राजेति दर्भस्तम्बमुपस्थाय।

स्तम्बस्थान् सर्वान् मनसा ध्यायन् 'यां संधाम्' इति नमस्कुर्यान्मन्त्रलिङ्गात् । अतः परं प्रणीतस्य लौकिकत्वम् ॥

अक्षतानादाय प्राङ्नोदङ्वा ग्रामान्निष्क्रम्य जुहुयादञ्जलिना हये राक इति चतसृभिः ॥

निहितानक्षतान् गृह्याग्निं च गृहीत्वाऽभ्युक्षणान्तं कृत्वाऽग्निं निधाय परिचरणतन्त्रेणाविच्छिद्याङ्गुल्यग्रैर्जुहुयादाहुतिमन्त्रम् ॥

प्राङुत्क्रम्य जपेद्वसुवन एधीति त्रिस्त्रिः प्रतिदिशमवान्तरदेशेषु च ॥ ९ ॥

होमं समाप्योत्तरतोऽग्नेः प्राचीं गत्वा प्रागुपक्रमं प्रदक्षिणमग्नेरष्टासु दिक्षु तिष्ठन्नग्नयभिमुखस्त्रिस्त्रिर्ब्रूयात् ॥

ऊर्ध्वं प्रेक्षन् देवजनेभ्यः ॥ १० ॥

'वसुवन एधि' इति त्रिर्ब्रूयात् ॥

तिर्यङ्नितरजनेभ्यः ॥ ११ ॥

तिर्यङ् प्रेक्षन् इतरजनेभ्यो मनुष्येभ्यः त्रिर्ब्रूयात् ॥

अवाङ्प्रेक्षन् प्रत्येत्यानवेक्षन्नक्षतान् प्राश्नीयात् ॥ १२ ॥

होमशिष्टानग्निं च गृहीत्वाऽनन्यचित्तो गृहं प्रत्यागम्य भक्षयेत् ॥

श्वोभूतेऽक्षतसक्तून् कृत्वा नवे पात्रे निधायास्तमिते बलीन् हरेदाऽऽग्रहायण्याः॥ १३॥

पूर्ववत् सक्तुकरणं, नार्धनिधानम् । सायंहोमानन्तरं पूर्ववदेव प्रतिदिशं बलिनिधानं शूर्पावपनपर्यन्तं आ मार्गशीर्षपौर्णमास्याः ॥

प्रौष्ठपदीं हस्तेनाध्यायानुपाकुर्युः ॥ १४ ॥

प्रौष्ठपदे मासे हस्तेन युक्ते काले अध्यायान् वेदभागान् तदङ्गानि च उपविष्टास्संहता आचार्यादिशिष्याश्च । नोपनयनादिवत् प्रत्येकम् । आङ् आद्यर्थे । आदावादौ कुर्युः अधीयीरन् वक्ष्यमाणेन प्रकारेण । प्रौष्ठपदे हस्त इति वक्तव्ये बह्वन्यथोक्तं अन्यदपि बहुस्मृतिसमाचारसिद्धमत्र कर्तव्यमिति सूचयितुम् । तदुच्यते--यद्यस्मिन् मासि हस्तद्वयसंभवे पूर्वस्मिन् हस्ते कुर्युः । नात्र पूर्वाह्णनियमः । प्रौष्ठपदीमिति सप्तम्यर्थे द्वितीया, तस्याः कृत्स्नसंयोगार्थत्वात् । 'अर्धपञ्चमान्मासानधीत्य पौषीमुत्सर्गः' इति वचनात् । पूर्वपक्षसम्भवाच्च पूर्व-

हस्तस्य । प्रौष्ठपद्याः पौर्णमास्यास्सन्निकृष्टत्वाच्च पूर्वास्मिन् हस्त इति । पञ्चगव्यमपामार्गं चूर्णितं दूर्वास्तैलमामलकसुपिष्टं हरिद्राकल्कं तिलाक्षतान् पत्राणि पुष्पाणि फलानि मूलानि वन्यानि धूपं दीपं गन्धमग्निं यज्ञोपवीतं दर्भांश्चादाय नदीं गत्वा तदलाभे यथालाभं महोदकं शुद्धजलं तटाकं गत्वा शिष्यैस्सह हर्षमाणो नाभिमात्रे सकृत्प्रगाह्याप आचम्य पञ्चगव्यं प्राश्याचम्य त्रिरेवं प्रगाह्य नैत्यं कर्म समाप्य उत्सर्जनकर्म करिष्य इति संकल्प्य तीर्थं प्रक्षाळ्यार्कपत्रेषूदगग्रेषु दर्भेषु वसिष्ठादीनां सप्तर्षीणां एकां पङ्क्तिं पांसुपिण्डैः प्रकल्प्य तथैव रणायनादीनाचार्यास्त्रयोदश शाट्यादीन् प्रवचनकर्तॄंश्च दश पङ्क्तिद्वयं प्रकल्प्य गङ्गादिषु नदीषु वसन्तीनां देवतानां नवानामेकां पङ्क्तिं प्रकल्प्य ब्रह्माणं वायुं मृत्युं वैश्रवणं काश्यपमग्निमिन्द्रं प्रजापतिं चैकां पङ्क्तिं वंशानुसारेण प्रकल्प्य साध्यानां मरुतां विश्वेषां देवानामष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च त्रयस्त्रिंशा इत्येषां चतुर्णां गणानामर्थे प्रतिगणमेकां पङ्क्तिं प्रकल्प्य मध्ययोः पङ्क्त्योः दक्षिणतो दाक्षणाग्रेषु दर्भेषु दक्षिणापवर्गं त्रीन् पितॄनेकां पङ्क्तिं प्रकल्प्य सर्वान् वसिष्ठादीनत्रावाह्य सन्निहितान् ध्यात्वा तेभ्यः स्वेषु स्वेषु पत्रेषु पवित्रमासनार्थं निधायाभ्यञ्जनार्थं तैलं प्रदाय शरीरपरिमार्जनार्थमपामार्गपिष्टं दत्वा केशप्रक्षाळनार्थमामलकं दत्वा 'आपो हिष्ठा, तरत्समन्दी, यः पावमानीः, शुद्धवत्यः, सोमं राजानं, यत इन्द्र, ब्रह्म जज्ञानं, पवित्रं ते,' इत्यृग्भिस्सामभिश्च स्नापनं कृत्वाऽऽचमनार्थमुदकं दत्वा वस्त्रं प्रदाय पुनराचमनं दत्वा यज्ञोपवीतं दत्वा हरिद्राकल्कं मङ्गलार्थं दत्वा अक्षतपुष्पमिश्रमुदकमर्घ्यं दत्वा पितृभ्यस्तु तिलमिश्रमुदकं दद्युः 'गन्ध-

द्वाराम्' इति गन्धं, 'ईडिष्व' इति धूपं, 'पवमानः' इति दीपं, 'अर्चत प्रार्चत, अर्चन्ति गायन्ति प्रागायत' इति द्वाभ्यां पुष्पाणि दद्युः । तत आचमनार्थमुदकं दत्वा भोजनार्थं फलानि वन्यानि दद्युः । पुनश्चोदकं ततो दर्भाक्षतान् पत्रेषु कृत्वा देवान् 'यथापूर्वम्' इत्यादि वंशं च ब्रुवन्तः स्वैः स्वैस्तीर्थैरमुष्मा अमुष्मा इदमुदकं तृप्तयेऽस्त्विति ध्यायन्तस्तर्पयेयुः प्रतिनाम । पितृणामक्षतस्थाने तिलाः । पित्र्यं सर्वं प्राचीनावीतिनः कुर्युः । देवर्षीणां सर्वं कृत्वा पश्चात्पितृणामभ्यञ्जनादि भोजनपर्यन्तं सर्वं मन्त्रवदेव कृत्वा पश्चात्तर्पणं कर्तव्यम् । दैवं सर्वं यज्ञोपवीतिनः कुर्युः । आर्षं सर्वं निवीतिनः । पित्र्यं सर्वं प्राचीनावीतिनः । ततो देवर्षिपितृणामुद्वासनं कृत्वा तानालोड्यावभृथसाम गायन्तः पांसुभिरात्मानमभ्युक्षापोऽभ्यवेयुः । एतदुत्सर्जनं नाम । ततो गृहं गत्वा यथाविभवमलं कुर्युः । अथाचार्यः उपाकर्म करिष्य इति संकल्प्य कृत्स्नेऽग्नौ ब्रह्मोपवेशनान्तं कृत्वा सप्त कूर्चान् सप्तर्षीन् संकल्प्य उदकपूर्णे कुम्भे सादयेत् । चतुरो वेदानेके सादयन्ति । ततस्सर्वे स्नानाद्यर्चनपर्यन्तं पूर्ववत् कुर्युः ॥

अथ प्रकृतमनुसरामः—

श्रावणीमित्येके ॥ १५ ॥

श्रावण्यां पौर्णमास्याम् ॥

हुत्वोपनयनवत् ॥ १६ ॥

स्तरणादि कृत्वा समस्तान्ताभिर्होमः । नात्र 'अग्ने व्रतपते' इत्यादीनि अर्थलोपात् । शिष्यास्तु सहिता एव भवेयुः । नात्रा-

न्वारम्भः, अतत्संस्कारत्वात् । अथ होमसमापनं, ततो यज्ञोपवीतमेखले नव ग्राह्ये शिष्यैः ॥

तत आह—

सावित्रीमनुवाचयेत् ॥ १७ ॥

वाचयेदिति सिद्धे अन्विति सावित्र्याः पश्चादन्यस्य वाचनार्थम् । किं तदनुवाच्यमित्याकांक्षाबलात् 'उपनयनवत्' इत्यस्यापि सूत्रस्य शेष इति ज्ञायते । अतः पच्छोऽर्धर्चशः सर्वामेकैकशो व्याहृतीनामोंकारस्य च वाचनं शिष्याणाम् ॥

सोमं राजानं पर्वादींश्च ॥ १८ ॥

'सोमं राजानम्' इति ऋक्च साम च नियमतो यत्राध्येतारो निरुच्छ्वासमुक्त्वा विरमन्ति चिरकालं तावदेकं पर्व। 'अग्न आयाहि, तद्वो गाय, उच्चा ते, इन्द्र ज्येष्ठम्, उपास्मै' इत्येकैकामृचं वाचयेत् । 'ओ ग्ना इ, तद्वौ हो वा, उच्चा' इत्येकैकं साम । यद्याकप्राणवाचोव्रतशुक्रियंद्यशक्करीसामानि पञ्च । ऊहे सप्त स्तोत्रीयाः । तथा रहस्ये ब्राह्मणे पर्वाद्यानि पञ्च वाक्यानि यावदेकार्थता । षड्विंशे सामविधावार्षेये देवताध्याये चाद्यानि वाक्यानि । 'देव सवितरोम्' इत्येतत्, 'असौ वा आदित्यः, यो ह वै ज्येष्ठम्' इत्युपनिषदि । संहितोपनिषदि वंशे चाद्ये वाक्ये । चकारात्तदङ्गाने लक्षणानि यथाधिगमः ॥

धाना दधि च प्राश्नीयुरभिरूपाभ्याम् ॥ १९ ॥

'धानावन्तम्' इति धानाः । आचम्य 'दधिक्राव्णः'

इति दधि । चकारात् पायसमुत्तरघृतमश्नीयुः । अत्र पूर्वाह्णनियमो नास्तीत्युपदेशः ॥

श्वोभूते प्राधीयीरन् शिष्येभ्यः ॥ २० ॥

श्वोभूते पूर्वाह्ण एव स्नात्वाऽलंकुर्युः । पूर्ववदृषीणां स्नानाद्यर्चनपर्यन्तं कृत्वा सावित्र्यादीनि पूर्वोक्तानि ब्रूयुः आचार्याद्शिष्येभ्यः । बहुवचनं पूजार्थम् ॥

अनुवाक्याः कुर्युः ऋगादिभिः प्रस्तावैश्च ॥२१

ऋक्षु पादमात्रैस्सामसु प्रस्तावमात्रैस्सावित्रीसोमराजे तु कृत्स्ने एव । चकारादनर्थार्थवाक्यमात्रैर्ब्राह्मणादिषु यथाऽनुवचनीयाः शिष्यास्तथा कुर्युराचार्याः ॥

अनुगानमरहस्यानाम् ॥ २२ ॥

इतःप्रभृत्यारण्यानामध्ययनान्निवृत्तिरोत्सर्जनात् ॥

विद्युत्स्तनयित्नुवर्जम् ॥ २३ ॥

उपाकर्मप्रभृति प्रागुत्सर्जनात् प्रातस्सन्ध्यायां विद्युत्स्तनयित्नू यदि दिवाऽनध्यायः । सायंसन्ध्यायां रात्रौ । तथाऽऽह मनुः—

प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने ।
सज्योतिस्स्यादनध्यायश्शेषं रात्रौ यथा दिवा ॥

यावच्छस्याप्राप्तं रोहितादिवर्णविवेकावगतिः, यावद्वा विद्युत्तावत् भवति तदनध्याय इत्यापस्तम्बमतिः ॥

अर्धपञ्चमान्मासानधीत्य पौषीमुत्सर्गः ॥२४॥

अर्धः पञ्चमो मासः येषां ते अर्धपञ्चममासाः अर्धाधिक-चतुर इत्यर्थः । पुष्येण युक्तायां पौर्णमास्यां पूर्वोक्तमुत्सर्जनं कुर्युः । अर्धपञ्चमान्मासानिति वचनात् प्रौष्ठपदे मासे हस्तद्वय-संभवे पूर्वहस्त एवोपाकरणम् । श्रावण्यामप्युपाकरणे पौष्या-मेवोत्सर्गः ॥

तत ऊर्ध्वमभ्रानध्यायः ॥ २५ ॥

वर्षसमर्थाः मेघा यदा दृश्यन्ते तदाऽध्यायो न भवति ॥

विद्युत्स्तनयित्नुपृषितेषु च ॥ २६ ॥

सन्ध्यायामेतेष्वाकालिकमनध्यायः । तथाऽऽह गौतमः— 'स्तनयित्नुवर्षविद्युतश्च प्रादुष्कृताग्निषु' इति । पृषितो वर्षः । चकारस्स्मृत्यन्तरोक्तानध्यायसंग्रहार्थः ॥

त्रिसन्निपाते त्रिसन्ध्यम् ॥ २७ ॥

प्रातस्सन्ध्यायां त्रयाणां सन्निपाते तदहोरात्रमुत्तरं चाहर-नध्यायः । सायंसन्ध्यायां सा रात्रिरुत्तरं चाहोरात्रम् ॥

अष्टकाममावास्यायां चातुर्मास्यीरुदगयने च पक्षिणीं रात्रीम् ॥ २८ ॥

माघमासे कृष्णाष्टम्यष्टका । चतुर्षु मासेषु भवाः पौर्ण-मास्यः चातुर्मास्याः । वर्षासु शरत्सु च याः । चकाराद्-क्षिणायने च । अष्टकाममावास्यायां चातुर्मासीष्वेकमहोरात्र-

मुत्तरं चाहरनध्यायः । अयनयोस्तु दिवा चेत् संक्रमणमहरुभयतश्च रात्रिरनध्यायः । रात्रौ चेत्सा रात्रिरुभयतश्चाहनी । अत्र रात्रिग्रहणमष्टकादिषु पूर्वरात्रिवर्जनार्थम् । केचिद्दिवा संक्रमणेऽपि यद्रात्रिसन्निधौ संक्रमणं तामुभयतोऽहस्सहितामाहुः । रात्रिग्रहणात् ॥

सब्रह्मचारिणि च प्रेते ॥ २९ ॥

स्वाचार्येणोपनीते मृते तत्प्रभृति कालत्रयमनध्यायः । चकारान्मातुलादिषु च ॥

उल्कापाते भूमिचले ज्योतिषोश्चोपसर्ग एतेष्वाकालिकं विद्यात् ॥ ३० ॥

ज्योतिषोस्सूर्याचन्द्रमसौर्ग्रहणे । चकारादव्यक्तेषु निमित्तेषु विद्यादिति स्मृत्यन्तरोक्तसंग्रहणार्थः ॥

कार्ष्णं तु कठकौथुमाः ॥ ३१ ॥

श्वभ्रेषु यावति वर्षे उदकं तिष्ठति तावति वर्षे सन्ध्यायां सति कठाः कौथुमाश्चानध्यायमाहुः, न वर्षमात्रे ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
तृतीयस्य पटलस्य
द्वितीयः खण्डः.

आश्वयुर्जां रुद्राय पायसः ॥ १ ॥

आश्वयुज्यां पौर्णमास्यां 'रुद्राय त्वा जुष्टं निर्वपामि' इति निर्वापः । चरुतन्त्रमेतत् ॥

मा नस्तोक इति जुहुयात् ॥ २ ॥

प्रधानाहुतिम् ॥

पयस्यवनयेदाज्यं तत्पृषातकम् ॥ ३ ॥

समाप्य होममवनयेत् । आज्यसंयुक्तस्य पयसः पृषातकमिति नाम ॥

तेनाभ्यागता गा उक्षेदा नो मित्रावरुणेति ॥

सायमागताः ॥

वत्सांश्च मातृभिस्सह वासयेत् तां रात्रिम् ॥५

स्पष्टम् ॥

नवयज्ञे पायस ऐन्द्राग्नः ॥ ६ ॥

तत्कालपक्वैस्सस्यैस्साध्यो यज्ञो नवयज्ञः । अनिष्ट्वा तु नवैर्न भोक्तव्यम् । शाकादीनां न प्रतिषेधः । शास्त्रान्तरात् कालद्रव्यावगतिः—शरदि पौर्णमास्यामपावास्यायां वा व्रीहिभिः । वसन्ते यवैः । 'इन्द्राग्निभ्यां त्वा जुष्टं निर्वपामि' इति निर्वापः । 'इन्द्राग्निभ्यां स्वाहा' इति प्रधानाहुतिः । चरुतन्त्रमेतत् ॥

शतायुधायेति चतसृभिराज्यं जुहुयादुपरिष्टात्

प्रधानाहुतेरुपरिष्टात् ॥

अग्नेः प्राभात्विति च ॥ ८ ॥

अनेनाप्याज्यं जुहुयात् । अथ स्विष्टकृदादि ॥

तस्य शेषं प्राश्नीयुर्यावन्त उपेताः ॥ ९ ॥

यश्चवास्त्वनन्तरस्य पायसस्य । उपेता उपनीताः, स्वभृत्यास्स्वयं च ॥

उपस्तीर्यापो द्विर्नवस्यावद्येत् ॥ १० ॥

भोजनार्थे पात्रे ॥

त्रिर्भृगूणाम् ॥ ११ ॥

पञ्चावत्तिनाम् ॥

अपां चोपरिष्टात् ॥ १२ ॥

अवत्तस्योपरि चापां निधानम् ॥

भद्रान्न इत्यसंख्याद्य प्रगिरेत्त्रिस्त्रिः ॥ १३ ॥

पाणिना प्राशनं, मन्त्रस्यापि त्रिरावृत्तिः । नान्तराऽऽचमनम् । अविवक्षितमेकवचनम् ॥

एतमु त्यमिति वा यवानाम् ॥ १४ ॥

अयं वा यवानां प्राशनमन्त्रः पूर्वो वा ॥

अमोसीति मुख्यान् प्राणानभिमृशेत् ॥१५॥

आचम्य चक्षुषी नासिके श्रोत्रे चाभिमृशेत् । अथ शिष्टमुदगुद्वास्य ब्रह्मणे दत्वा दक्षिणां दद्यात् ॥

आग्रहायणं कर्म श्रावणेन व्याख्यातम् ॥ १६ ॥

मार्गशीर्ष्यां पौर्णमास्यां भर्जनादिप्राशनान्तं पूर्वाह्णे कुर्यात् उपवसथ्येऽहनि ॥

नमः पृथिव्या इति न जपेत् ॥ १७ ॥

मन्त्रत्रयस्य प्रतिषेधः ॥

प्रदोषे पायसस्य जुहुयात् प्रथमेति ॥ १८ ॥

तस्मिन्नेव दिने रात्र्यामाद्ये यामे 'हव्यवाहाय त्वा जुष्टं निर्वपामि' इति निर्वापः । सर्वत्र केवलमन्त्रनिर्देशे तूष्णीं निर्वाप इति केचित् । मन्त्रेण प्रधानाहुतिः । चरुतन्त्रमेतत् ॥

न्यञ्चौ पाणी कृत्वा प्रतिक्षत्र इति जपेत्॥१९॥

होमं समाप्य जपेत् भूमिगतावधाञ्चौ पाणी कृत्वा ॥

पश्चादग्नेः स्वस्तरमुदग्ग्रैस्तृणैरुदक्प्रवणमास्तीर्य तस्मिन्नास्तरणे गृहपतिरास्ते ॥ २० ॥

स्वस्तरमिति कर्मनाम ॥

अनुपूर्वमितरे ॥ २१ ॥

सर्वे भृत्याः क्रमेणोत्तरतः स्वस्तर एवासते ॥

अनन्तरा भार्या पुत्राश्च ॥ २२ ॥

भार्याऽनन्तरं पुत्राः । चकारात् पुत्रानन्तरमितरे ॥

न्यञ्चौ पाणी कृत्वा स्योनेति गृहपतिर्जपेत्॥२३

भूमिगतौ कृत्वा ॥

समाप्तायां दक्षिणैः पार्श्वैस्संविशेयुस्त्रिरभ्यात्ममावृत्य ॥ २४ ॥

'स्योना' इत्यृचि समाप्तायां प्राक्शिरस्सस्संविशेयुः ॥

स्वस्त्ययनानि कुर्युः ॥ २५ ॥

आशीर्वचनानि ॥

ततो यथार्थं स्यात् ॥ २६ ॥

तत एव यथार्थं न पूर्वमिति । 'आग्रहायणम्' इत्यारभ्य एक एवासौ प्रयोग इत्यर्थः ॥

ऊर्ध्वमाग्रहायण्यास्तिस्रस्तामिस्राष्टम्योऽष्टका इत्याचक्षते ॥ २७ ॥

अपरपक्षाष्टम्यः ॥

तासु स्थालीपाकाः ॥ २८ ॥

एकस्यामेकः ॥

अष्टौ चापूपाः प्रथमायाम् ॥ २९ ॥

स्पष्टम् ॥

तानपरिवर्तयन् कपाले श्रपयेत् ॥ ३० ॥

'अष्टकायै त्वा जुष्टं निर्वपामि' इति निरुप्य विभज्यार्धं स्थालीपाक चरुस्थाल्यां निधायापरं चार्धमष्टावपूपान् कृत्वैकस्मिन् कपाले युगपच्छ्रपयेत् ॥

उत्तमायां शाकमन्वाहार्यं ॥ ३१ ॥

उपदंशार्थं ब्राह्मणभोजने दद्यात् ॥

अष्टकायै स्वाहेति जुहुयात् ॥ ३२ ॥

प्रधानाहुतिम् । चरुतन्त्रमेतत् । चरोरपूपेभ्यश्च किंचिंकिंचिदादाय स्विष्टकृदर्थं संहतमेकैकमवदानम्[1] । उत्तमायां चरुरेव हविः । समानमितरत् । मध्यमायां तु विशेषं वक्ष्यति॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
तृतीयस्य पटलस्य
तृतीयः खण्डः.

मध्यमायां गौः ॥ १ ॥

स्थालीपाकेन समुच्चयः । चरुश्रपणवर्जमाज्यसंस्कारान्तं कुर्यात् ॥

तत आह—

तां पुरस्तादग्नेः प्रत्यङ्मुखीमवस्थाप्य जुहुयाद्यत्पशव इति ॥ २ ॥

स्पष्टम् ॥

हुत्वा चानुमन्त्रयेतानु त्वेति ॥ ३ ॥

व्याहृतिभिश्च हुत्वा पशुमनुमन्त्रयेत ॥

यवमतीभिरद्भिः प्रोक्षेदष्टकायै त्वा जुष्टं प्रोक्षामीति ॥ ४ ॥

स्पष्टम् ॥

प्रोक्ष्योल्मुकेन परिहृत्य प्रोक्षणीः पाययेत्॥५॥

---

[1] संहितमेव होतव्यमिति पा,

तूष्णीं प्रोक्ष्य गृह्याग्नेरुल्मुकेन पशुं प्रदक्षिणं परिवार्य प्रोक्षणीशेषं पाययेत्पशुम्। उल्मुकमग्नावतिसृजेत्॥

उदङ्मुत्सृप्य प्रत्यक्छिरसीमुदक्पादीं संज्ञपयेत्॥

शमिता॥

संज्ञप्तायां जुहुयाद्यत्पशुरिति॥ ७॥

गृहपतिः॥

तस्याः पत्नी स्रोतांसि प्रक्षाळयेत्॥ ८॥

तस्याः स्रोतांसि चक्षुश्श्रोत्रनासास्यपायूपस्थानि पत्नी प्रक्षालयेत्॥

पवित्रे अन्तर्धायोत्कृत्य वपामुद्धारयेत्॥ ९॥

शमिता॥

यज्ञियस्य वृक्षस्य विशाखाशाखाभ्यां परिगृह्याग्नौ श्रपयेत्॥ १०॥

गृहपतिः॥[1]

प्रसृतायां विशसेत्॥ ११॥

यदा श्रपणाद्वपायाः प्रस्रवेद्वारि तस्मिन् काले शमिता पशुं विशसेत्॥

उक्तमुपस्तरणाभिघारणं यथा स्विष्टकृतः॥ १२

स्पष्टम्॥

---

1 "श्रपयमाणायां जघन्यायां स्रुवेण शमिता गोविशसनं कुर्यात्" इत्यधिकं केषुचित्कोशेष्वास्ते॥ एकादशसूत्रस्य वृत्तिर्नास्ति॥

'सकृदुपस्तीर्य' इत्यादि यथोक्तं तथाऽत्रापि हविस्स्थाने कृत्स्नां वपाम् ॥

अष्टकायै स्वाहेति जुहुयात् ॥ १३ ॥

स्पष्टम् ॥

सर्वाङ्गेभ्योऽवदानान्युद्धारयेत् ॥ १४ ॥

हृदयजिह्वावक्षोयकृद्क्लोम्न[1] द्वितयसव्यबाहुपार्श्वद्वयदक्षिणाश्रोणिगुदेभ्य एकादशाङ्गेभ्य आहुतिमात्रमुद्धारयेच्छमिता ॥

न सव्यात्सक्थ्नः ॥ न क्लोम्नः ॥ १५–१६ ॥

पूर्वस्यान्वष्टक्यार्थत्वादुत्तरस्याहव्यत्वात् ॥

सव्यं सक्थि निधाय ॥ १७ ॥

अन्वष्टक्यार्थम् ॥

पृथङ्मेक्षणाभ्यामवदानानि स्थालीपाकं च श्रपयित्वा ॥ १८ ॥

अवदानानां कुम्भ्यां श्रपणं, स्रुवस्तूष्णीं निर्वापः, श्रपयित्वाऽवदानानि स्थालीपाकं चाभिघार्योद्गुद्धास्य प्रत्यभिघार्य बर्हिषि कंसं प्लक्षशाखाश्चैकादश सादयेत् ॥

तत आह—

कंसे रसं प्रस्नाव्य ॥ १९ ॥

अवदानरसम् ॥

प्लक्षशाखास्ववदानानि कृत्वा ॥ २० ॥

[1] यकृत्पक्ष, पा.

हृदयाद्येकादशाङ्गानि निधाय ॥

एकैकस्मात् कंसेऽवद्येत् ॥ २१ ॥

कंसस्थे रसे प्रत्येकं मध्यात्पुरस्ताच्च ॥

स्थालीपाकाच्च ॥ २२ ॥

स्पष्टम् ॥ अथ परिषेकाद्याज्यभागान्तम् । ननु 'हुत्वा चानुमन्त्रयेत' इति व्याहृतिहोमानां विद्यमानत्वादत्राज्यभागौ न स्तः । अन्यविषयत्वात्, प्रपदानन्तरं यत्र व्याहृतिहोमस्तत्र तयोः प्रतिषेधः ॥

तत आह—

चतुर्गृहीतमष्टगृहीतं वाऽत्र जुहुयादग्नाविति ॥

द्वाविंशतिः पश्ववदानानि, तेषां चत्वार्यष्टौ वा चर्ववदानमिश्राणि गृहीत्वा जुहुयात् । अत्रेत्युपस्तरणाभिघारणप्रतिषेधार्थं, अत्रैव गृहीत्वा जुहुयान्नान्यत इति ॥

कंसात्पराभिर्द्वाभ्यांद्वाभ्यामेकैकामाहुतिम् ॥ २४

कंसादेव गृहीत्वा पराभिः ऋग्भिः 'औलूखलाः' इत्यादिभिष्षड्भिर्द्वाभ्यामेकैकामाहुतिं द्वाभ्यां पश्ववदानाभ्यां चर्ववदानमिश्राभ्यां जुहुयात् ॥

सौविष्टकृतीमष्टम्या ॥ २५ ॥

कंसे यच्छिष्टं तेन 'अन्वियं नः' इति स्विष्टकृत्स्थानापन्नं जुहुयात् । अतो न स्विष्टकृदन्तरम् । अथोपरिष्टाद्धोमादि ॥

वह वपामिति पित्र्ये वपाहोमः ॥ २६ ॥

पितृदैवत्ये कर्मणि ॥

जातवेद इति दैवत्ये ॥ २७ ॥

वपाहोमः ॥

तदादेशमनाज्ञाते ॥ २८ ॥

अनिर्दिष्टोभयभावे कर्मनाम्नैव ॥

यथाऽष्टकाया इति ॥ २९ ॥

अत्रैवाभिहितम् ॥

पशुरेव पशोर्दक्षिणा ॥ ३० ॥

एवकार उपालब्धतुल्यार्थः ॥

स्थालीपाकस्य पूर्णपात्रम् ॥ ३१ ॥

यथोत्साहनिवृत्त्यर्थम् । चरुतन्त्रप्रकृतिरयं होमः ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
तृतीयस्य पटलस्य
चतुर्थः खण्डः

नवमीं दशमीं वाऽन्वष्टक्यम् ॥ १ ॥

द्वितीयाऽत्यन्तसंयोगार्था । पूर्वाह्णव्यतिरेकार्था । तेनानाहृते च पूर्वाह्णे पित्र्यत्वादपराह्णनियमः । पित्र्यत्वं च पिण्डप्रदानप्रधानत्वात् । प्राचीनावीती कुर्यात् । अत्रापि होमे तदङ्गेषु च

यज्ञोपवीत्येव । मध्यन्दिनादूर्ध्वमपराह्णः । अहः पञ्चधा विभज्य चतुर्थो वा भागः अह्नस्तृतीयो वा भाग इति केचित् । अष्टकामनु क्रियत इत्यन्वष्टक्यं कर्म, एतच्च प्रत्यष्टकमनन्तरं कर्तव्यम् ॥

दक्षिणपूर्वे भागे परिवार्य तत्रोत्तरार्धे मथित्वाऽग्निं प्रणयेत् ॥ २ ॥

गृहस्य दक्षिणपूर्वभागे, गृह्याग्नेरिति केचित् । प्रोक्षणान्तं कृत्वा प्रणयेत् निदध्यादित्यर्थः । अस्य श्रपणार्थत्वात् प्राचीनावीती ॥

सकृद्गृहीतान् व्रीहीन् सकृत् फलीकृतान् प्रसव्यमुदायुवं श्रपयेत् ॥ ३ ॥

सकृद्गृहीतान् सकृत्फलीकृतानिति सिद्धवद्व्यपदेशान्न स्वयं कर्तृत्वनियमः । भूतकालनिर्देशाच्च नापराह्णनियमः । सकृदेव तूष्णीं स्थाल्यां निरुप्य सकृत्प्रक्षाल्य मेक्षणेन प्रसव्यमप्रदक्षिणमुदायुवं श्रपयेत् मथितेऽग्नौ गृह्ये वा ॥

अमुष्माच्च सक्थ्नो मांसमिति ॥ ४ ॥

अन्वष्टक्यार्थं निहितात् सव्यसक्थ्नो मांसं भोजनार्थवच्छकलीकृत्य स्थाल्यन्तरे मेक्षणान्तरेणोदायुवं श्रपयेत् । इतीति चेदर्थे । सक्थि चोद्धृयते तदैवम् । प्रथमोत्तमयोस्त्वष्टकयोरन्वष्टक्ये स्थालीपाक एवेत्यपरं मतम्—'अष्टकायै स्वाहेति जुहुयात्' इति तिसृष्वप्यष्टकास्वविशेषेण वचनात् मध्यमायामपि पश्वसंभवे केवलस्थालीपाकहोमोऽप्यनुज्ञात एवेति तस्मिन् पक्षेऽन्वष्टक्येऽपि स्थालीपाकश्रपणमेव ॥

दक्षिणोद्वास्य न प्रत्यभिघारयेत् ॥ ५ ॥

मांसं चरुं च शृतमभिघार्य ॥

पश्चादग्नेर्दक्षिणतस्तिस्रः कर्षूः खन्याच्चतुरङ्गुल-मधस्तिर्यक् ॥ ६ ॥

पश्चादग्नेरुपविष्ट आत्मनो दक्षिणतो दाक्षिणापवर्गाः कर्षूः खन्यात् अपणात् पूर्वमेवास्मिन् देश उपवेशने सिद्धे पश्चाद-ग्नेरिति वचनं वक्ष्यमाणं सर्वमस्मिन्नेव देश उपविश्य कुर्यादि-त्येवमर्थम् ॥

तासां पुरस्तादग्निं प्रणयेत् ॥ ७ ॥

मध्यमकर्ष्वाः पुरस्ताद्ऋजुदेशे द्विपदमात्रं स्वस्तरदेशमतीत्य तत्रोपलेपनादि प्रोक्षणान्तं कृत्वा मथितं सर्वं निदध्यात् यज्ञो-पवीती सर्वत्र । यदा वा प्राचीनावीती भूत्वा यज्ञोपवीती भवति तदाऽप उपस्पृशेत् ॥

स्तृणुयात् ॥ ८ ॥

स्तरणान्तं यज्ञोपवीती कुर्यात् । नात्र ब्रह्मा । अत्र पश्चात् स्तरणपक्षः ॥

कर्षूश्च ॥ ९ ॥

कर्षूणामुपरि दक्षिणाग्रैः प्राचीनावीती छादयेत् न प्रति-कर्षु दर्भभेदः ॥

पश्चादग्नेः स्वस्तरं दक्षिणाग्रैस्तृणैर्दक्षिणाप्रवण-मास्तीर्य ब्रसीमुपनिदध्यात् ॥ १० ॥

स्वस्तरमिति कर्मनाम । ब्रसी कूर्मफलकं, कटमिति केचित्। स्वस्तरोपरि निधानम् ॥

तस्मिन्नेकैकमाहरेत् ॥ ११ ॥

तस्मिन् ब्रसीसंज्ञके उदकपूर्णानि त्रीणि पात्राणि तिस्रो दर्भपिञ्जूलीश्चरुमज्ञनं तैलं गन्धं सूत्रतन्तूंश्चैकैकशः क्रमशो निदध्यात् । एतान्येव प्राचीनावीती कृत्वा यज्ञोपवीती दर्भोपवेशनादि प्रपदान्तं कुर्यात् । बर्हिषि सादनकाले कंसं च सादयेत् ॥

कंसे समवदाय मेक्षणेनोपघातं जुहुयात् स्वाहा सोमाय पितृमते स्वाहाऽग्नये कव्यवाहनायेति ॥ १२ ॥

चरुं मांसं च सहावदाय । यदि मांसं विद्यते मेक्षणेन । स्रुवजुह्वोर्निवृत्तिः प्रधानहोमयोः । नात्रोपस्तरणाभिघारणे । उपघातशब्दः पूर्वं व्याहृतिहोमार्थः । अत एव नाज्यभागस्विष्टकृतः । कृत्स्नमन्त्रोच्चारणमन्ते स्वाहाकारनिवृत्तये । अथ गानान्तं समापयेत् । अत ऊर्ध्वं प्राचीनावीती ॥

सव्येनोल्मुकं दक्षिणतः कर्षूषु निदध्यादपहता इति ॥ १३ ॥

सव्येन हस्तेन कर्षूः प्रज्वाल्य तासां दक्षिणतो निदध्यादुल्मुकं यथाऽऽसमाप्तेर्नानुगच्छेत् । 'अस्मात्' इति मन्त्रान्तः ॥

पूर्वस्यां कर्ष्वां पितुः ॥ १४ ॥

प्रथमखातायां वक्ष्यमाणं पित्र्ये यत्कृत्यं तत्कुर्यात् ॥

मध्यमायां पितामहस्योत्तमायां प्रपितामहस्य ॥ १५ ॥

वक्ष्यमाणं सर्वं पितृतीर्थेन दक्षिणापवर्गं क्रमेण पितृपितामहप्रपितामहानुद्दिश्य दक्षिणेन पाणिना कुर्यात्। 'एत पितरः' इति पित्रादीनावाहयेत्, मन्त्रलिङ्गात्॥

उदपात्राण्यपसलवि कूर्षु निनयेदेकैकस्य नामोक्त्वाऽसावव॑नेनिक्ष्व ये चात्र त्वाऽनु यांश्च त्वमनु तस्मै ते स्वधेति ॥ १६ ॥

अपसलवि पितृतीर्थेन। प्रदेशिन्यङ्गुष्ठयोरन्तरा पितृतीर्थम्। 'विष्णुशर्मन् पितः अवनेनिक्ष्व' इतिवत् पित्रादीनां निर्देशः। यदि नामानि न विद्यात् तदा पितः पितामह प्रपितामहेत्येव ब्रूयात्। पुत्रिकापुत्रस्तु मात्रे मातामहाय तत्पित्रे च दद्यात्। अथ वा मातामहाय तत्पित्रे तत्पित्रे च दद्यात्। यदि जनयितुः पुत्रान्तरं न विद्यते द्वौ द्वावेकस्मिन् पिण्डे निर्दिशेत् पुत्रिकापुत्रः, तथा दत्तपुत्रोऽपि जनयितुः पुत्रान्तराभावे। एवमन्योपि यो द्वयोः पुत्रस्स्यात्॥

तथैव पिण्डान्निधाय जपेदत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति ॥ १७ ॥

कंसाद्गृहीत्वा। 'अवनेनिक्ष्व' इत्यस्य स्थाने 'भुङ्क्ष्व' इत्यूहः॥

उक्त्वोदङ्मावर्तेत सव्यं बाहुमुपसंहृत्य प्रसव्यमावृत्य ॥ १८ ॥

व्याहृतिपूर्वां सावित्रीं तस्यां चैव गायत्रं यद्वा 'उ विश्पतिः' इत्यादीनि पित्र्याणि सामान्युक्त्वा सव्यं बाहुमुपसंहृत्य दक्षिणं बाहुं प्रसार्य प्रसव्यमावृत्योदङ्मुखः स्यात् ॥

उपताम्य कल्याणं ध्यायन्नभिपर्यावर्तमानो जपेत् अमी मदन्त पितरो यथाभागमावृषायिषतेति ॥ १९ ॥

यथाशक्ति निरुच्छ्वास आसीन उच्छ्वास्य यदात्मनोऽभिलषितं मेऽस्त्विति ध्यायन् जपेत् । अभिलषितं तृप्ताः पितरः प्रयच्छन्तीति ह स्मरन्ति ॥

तिस्रो दर्भपिञ्जूलीरञ्जने निघृष्य कर्पूषु निदध्याद्यथापिण्डम् ॥ २० ॥

अङ्क्ष्वेत्यूहः ॥

तैलं सुरभि च ॥ २१ ॥

सुरभि गन्धम् । अभ्यङ्क्ष्वानुलिम्पेत्यूहः ॥

पिण्डप्रभृति यथार्थमूहेत् ॥ २२ ॥

तत्तद्विषयानुगुणमूहेत् ॥

अथ निह्नवनम् ॥ २३ ॥

अथानन्तरदेशे कर्पूणां पश्चात् पाणी निधाय । निह्नवनमिति वक्ष्यमाणस्य संज्ञा व्यवहारार्था ॥

पूर्वस्यां कर्प्वां दक्षिणोत्तानौ पाणी कृत्वा न-

मो वः पितरो जीवाय नमो वः पितरश्शूषायेति ॥ २४ ॥

अथ पूर्वस्याः कर्ष्वाः पश्चात्समीपे दक्षिणं पाणिं प्रागग्राङ्गुलिमुत्तानं भूमौ निधाय तदुपरि तथैव सव्यं न्यञ्चं कृत्वा जपेत् ॥

सव्योत्तानौ मध्यमायां नमो वः पितरो घोराय नमो वः पितरो रसायेति ॥ २५ ॥

सव्यस्योपरि दक्षिणं न्यञ्चं कृत्वा ॥

दक्षिणोत्तानौ पश्चिमायां नमो वः पितरः स्वधायै नमो वः पितरो मन्यव इति ॥२६॥

स्पष्टम् ॥

अञ्जलिं कृत्वा नमो व इति ॥ २७ ॥

नमस्काराञ्जलिं कृत्वा पितॄनुपातिष्ठते ॥

सूत्रतन्तून् कर्षूषु निदध्याद्यथापिण्डमेतद्व इति ॥ २८ ॥

क्रमेण ॥

ऊर्जं वहन्तीरिति कर्षूरनुमन्त्रयेत ॥ २९ ॥

सकृत् ॥

मध्यमं पिण्डं पुत्रकामां प्राशयेदाधत्तेति॥३०॥

पतिर्मन्त्रं ब्रूयात् ॥

अभून्नो दूत इत्युल्मुकमग्नौ प्रक्षिपेत् ॥ ३१ ॥

यद्दक्षिणतो निहितं मन्त्रलिङ्गात् ॥

द्वंद्वं पात्राण्यतिहरेयुः ॥ ३२ ॥

निहितानि परिचारका उद्वासयेयुः ॥

एष एव पिण्डपितृयज्ञकल्पः ॥ ३३ ॥

कल्प इति प्रयोगकृत्तिरेवातिदिश्यते, न कालः । स त्वन्यतो विज्ञायते यस्मिन्नहोरात्रेऽमावास्याक्षणः तस्मिन्नेवापराह्णे कुर्यात् । विशेषस्तूच्यते ॥

गृह्येऽग्नौ हविः श्रपयेत् ॥ ३४ ॥

चरुरेव न मांसम् ॥

तत एवातिपणयेत् ॥ ३५ ॥

गृह्याग्नेरेवैकदेशम् । प्रणीतस्य कर्मापवर्गे लौकिकत्वम् । अत्र ब्रह्मास्ति, दक्षिणा च हविरुच्छिष्टदानम् ॥

एका कर्षूः ॥ ३६ ॥

एकस्यामेव पित्रादीनां त्रयाणामपि सर्वं यथाक्रमं कुर्यात् ॥

न स्वस्तरः ॥ ३७ ॥

न स्वस्तरदेशे द्रव्याणां निधानम् ॥

इद्राण्याः स्थालीपाकस्यैकाष्टकीति जुहुयात् ॥

चैत्री पौर्णमासी कालः 'चैत्रचाश्वयुजी' इति गौतमवच-

नात् । 'इन्द्राण्यै त्वा जुष्टं निर्वपामि' इति निर्वापः । एकाष्टकेति प्रधानाहुतिः । चरुतन्त्रमेतत् ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
तृतीयस्य पटलस्य पञ्चमः खण्डः.
पटलश्च समाप्तः.

उक्तानि नित्यानि । पुष्टिकामार्थानि च वक्ष्यमाणभोजननियमानपेक्षाणि मन्त्रक्रमानुसारेणोक्तानि । इदानीं वक्ष्यमाणकाम्यविशेषार्थं भोजननियममाह—

काम्येषु षड्भ्य ऊर्ध्वानि त्रीणि वा नाश्नीयात् ॥ १ ॥

काम्यग्रहणाच्चत्र कामप्रतिपादनपरः कामशब्दः इच्छाशब्दो वा नास्ति तत्र नायं नियमः । चतुर्थ्या पञ्चम्या वा आदित्यापस्थाने, 'भूर्भुवस्स्वरोम्, आदित्य नावम्, वास्तोष्पते' इत्येतेषु, कम्बूकपण्योपतापिहोमेषु, ग्रन्थिकरणे, हरितगोमयप्रभृतिषु, आ च परिसमाप्तेर्नियमाभावः । व्रीहियवाक्षततण्डुलान् तिलतण्डुलान् कणान् कम्बूकान् पुरीषहरितगोमयं च परिचरणतन्त्रेण जुहुयात्. शङ्कुशतं समित्तन्त्रेण वास्तूपतापिहोमौ चरुतन्त्रेण. शिष्टान् होमानाज्यतन्त्रेण । षड्भ्य ऊर्ध्वानि त्रयहम् ॥

नित्यप्रयुक्तानामादितः ॥ २ ॥

नियमानन्तरं नियमेन प्रयोक्तुमशक्तानामादावभोजनम् ॥

उपरिष्टात्सान्निपातिके ॥ ३ ॥

नैमित्तिकैकं कृत्वा अभोजनम् ॥

एवं यजनीयप्रयोगेषु ॥ ४ ॥

यजनीय इति निर्दिश्य विहितेषु कर्मसु ॥

अर्धमासव्रती ॥ ५ ॥

'अर्धमासव्रती पौर्णमास्यां रात्रौ' इत्यादावर्धमासमभोजनम् ॥

अशक्तौ पेयमेकं कालम् ॥ ६ ॥

अर्धमासव्रते । पेयं क्षीरादि ॥

अरण्ये प्रपदं जपेदासीनः प्राग्ग्रेषु ॥ ७ ॥

अत्रासननियमादन्यत्र जपे त्वासननियमो नास्ति ॥

एवं ब्रह्मवर्चसकामः ॥ ८ ॥

एवं जपन् ब्रह्मवर्चसी भवति ॥

यथोक्तं पशुकामः ॥ ९ ॥

गोष्ठे पशुकामः उदग्ग्रेषु ॥

सहस्रबाहुरिति पशुस्वस्त्ययनकामो व्रीहियवौ जुहुयात् ॥ १० ॥

पशूनां शोभनाविच्छेदकामः । मिश्रीकृत्य त्रिः प्रक्षाल्य होमः । स्वाहेति च होमो द्वितीयः ॥

येनेच्छेत्सहकारं कौतोमतेनास्य महावृक्षफलानि परिजप्य दद्यात् ॥ ११ ॥

येन सख्यमिच्छेत्तस्मा उदुम्बरफलानि 'कौतोमतम्' इत्यने नाभिमन्त्र्य दद्यात् ॥

अर्धमासव्रती पौर्णमास्यां रात्रौ नाभिमात्रं प्रगाह्याविदासिनि ह्रदेऽक्षततण्डुलानास्येन जुहुयादुदके वृक्ष इवेति पञ्चभिः पार्थिवं कर्म ॥ १२ ॥

अविदासिनि अशोष्ये तिष्ठन्नेवाक्षततण्डुलान् । अर्थलोपान्न समित् । अग्निस्थान उदकम् । पृथिवीपातित्वप्राप्त्यर्थमिदमुक्तं कर्म ॥

प्रथमयाऽऽदित्यमुपातिष्ठेद्भोगकामोऽर्थपतौ प्रेक्षमाणे ॥ १३ ॥

'वृक्ष इव' इत्यादीनामेव प्रत्येकं कर्मोच्यते कामनाभेदेन। एषु नार्धमासव्रतित्वम् । द्रव्यानुभवकामः द्रव्यपतावात्मानं पश्यति सति ॥

द्वितीययाऽक्षततण्डुलानादित्ये पारिविष्यमाणे बृहत्पत्रस्वस्त्ययनकामः ॥ १४ ॥

'स्वाहा' इति द्वितीयाम् । पत्रं गमनसाधनं, महतामश्वादीनां शोभनाविच्छेदकामः ॥

तृतीयया चन्द्रमसि तिलतण्डुलान् क्षुद्रपशुस्वस्त्ययनकामः ॥ १५ ॥

परिविष्यमाणे चन्द्रमसि । मिश्रीकृत्य होमः । स्वाहेति द्वितीयाम् । क्षुद्रपशवोऽजाविकादयः ॥

चतुर्थ्याऽऽदित्यमुपस्थाय गुरुमर्थमभ्युत्तिष्ठेत्॥

महद्द्रव्यं प्राप्तुमुद्योगं कुर्यात् । एवं कृते फलातिशयो भवति ॥

पञ्चम्याऽऽदित्यमुपस्थाय गृहानेयात् ॥ १७ ॥

वेश्म प्रविशेत् उत्तिष्ठेत् फलातिशयो भवति ॥

अनकाममारं नित्यं जपेत् भूरिति ॥ १८ ॥

अहरहरामरणाद्यो जपेत् अनकाममरणं स लभते अकामो न म्रियते इत्यर्थः ॥

यजनीये जुहुयान्मूर्ध्नोऽधि म इति षड्भिर्वाम-देव्यर्गभिर्महाव्याहृतिभिः प्राजापत्यया च॥

नित्यादूर्ध्वमेतत् ॥

अलक्ष्मीनिर्णोदः ॥ २० ॥

उक्तस्य होमस्य फलं अलक्ष्म्या अपगमः ॥

अक्षेमे पथ्यपेहीति जपेत् ॥ २१ ॥

मन्त्रलिङ्गात् क्षेमो भवति ॥

यशोऽहमित्यादित्यमुपतिष्ठेद्यशस्कामः पूर्वाह्न-मध्यन्दिनापराह्णेषु ॥ २२ ॥

'तेन मा विश' इत्यन्त एष मन्त्रः । अहरहरुपस्थानम् ॥

प्रातरह्नस्येति यथार्थमूहेत् ॥ २३ ॥

मध्याह्नस्य सायाह्नस्येति च ॥

आदित्यनावमिति सन्ध्योपस्थानं स्वस्त्ययनम्

शुभागमप्राप्तिसाधनमेतदहरहरुपस्थानम् ॥

उद्यन्तं त्वेति पूर्वां प्रतितिष्ठन्तं त्वेति पश्चिमाम् ॥ २५ ॥

'उद्यन्तं त्वा' इति पूर्वां सन्ध्यामुपतिष्ठन् 'उदीयासम्' इति मन्त्रं समापयेत् । 'प्रतितिष्ठन्तं त्वाऽऽदित्यानुप्रतितिष्ठासम्' इति पश्चिमाम् ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
चतुर्थस्य पटलस्य
प्रथमः खण्डः.

अर्धमासव्रती तामिस्रादौ ब्राह्मणानाशयेत् व्रीहिकंसोदनम् ॥ १ ॥

अपरपक्षे प्रतिपदि व्रीह्योदनं कंसेभोजयेत् ॥

तस्य कणानपरासु सन्ध्यासु प्रत्यग्ग्रामात् स्थण्डिलमुपलिप्य भलायेति जुहुयाद्भल्लायेति च ॥ २ ॥

उक्तव्रीहिकणान् सायंसन्ध्यासु आगामितामिस्रादेः । भलाय स्वाहा भल्लाय स्वाहेति च ॥

एवमेवापरस्मिंस्तामिस्रादौ ॥ ३ ॥

व्रीहिकंसोदनं ब्राह्मणानाशयेत् ॥

ब्रह्मचर्यमा समाप्तेः ॥ ४ ॥

आ फलनिष्पत्तेः कर्म आ कर्मसमाप्तेर्ब्रह्मचर्यम् ॥

किं तत्फलम्—

आचितशतं भवति ॥ ५ ॥

यावद्व्यमस्य पूर्वमाचितं संचितं तच्छतगुणितं भवति । इदमस्य फलम् ॥

गौरे भूमिभागे ब्राह्मणो लोहिते क्षत्रियः कृष्णे वैश्योऽवसानं जोषयेत् समं लोमशमनिरिणमशुष्कम् ॥ ६ ॥

अवसानं वासस्थानं सेवेत । श्वभ्रादिरहितं तृणबहुलमनूषरमनतिकठिनमुदकबहुलमिति यावत् ॥

यत्रोदकं प्रत्यगुदीचीं प्रवर्तेत ॥ ७ ॥

प्रत्यगुदकप्रवणम् ॥

अक्षीरिणः कण्टकिनः कटुकाश्चात्रौषधयो न स्युः ॥ ८ ॥

अक्षीरिणः कण्टकिनः कटुरसाश्च वृक्षा यत्र पूर्वमपि स्युः तमपि वर्जयेत् ॥

दर्भसंमितं ब्रह्मवर्चस्यम् ॥ ९ ॥

दर्भसंयुक्तं, ब्रह्म वेदः तच्चोदितानुष्ठानजनितं वैमल्यं ब्रह्मवर्चसं तदर्थं ब्रह्मवर्चस्यम् ॥

बृहत्तृणैर्बल्यम् ॥ १० ॥

स्थूलतृणैर्युक्तं बल्यं बलार्थम् ॥

मृदुतृणैः पशव्यम् ॥ ११ ॥

शादाभिर्मण्डलद्वीपिभिर्वा दीर्घशूलीभिः मृदुतृणैर्युक्तं पश्वर्थम् ॥

यत्र वा स्वयं कृताः श्वभ्रास्सर्वतोऽभिमुखाः स्युः ॥ १२ ॥

अप्रयत्नजाः कर्ष्व ऊर्ध्वमुखोदका यत्र तदपि गव्यम् ॥

आवासभूमिरुक्ता । अथ गृहमाह--

प्राग्द्वारं धन्यं यशस्यं चोदग्द्वारं पुत्र्यं पशव्यं च दक्षिणापश्चिमद्वारे सर्वे कामा अनुद्वारं गेहद्वारम् ॥ १३ ॥

यस्यां दिशि बहिर्द्वारं तस्यामेवान्तर्द्वारं स्यात् ॥

असंलोकी स्यात् ॥ १४ ॥

गृहमध्ये द्वारं न स्यात् । द्वारद्वयं परस्परमृजु स्यादिति केचित् ॥

अथ तद्गृहवासिनामभ्युदयसाधनं होममाह—

पयसो हविः ॥ १५ ॥

वास्तोष्पतये त्वा जुष्टं निर्वपामीति निर्वापः ॥

कृष्णा च गौः ॥ १६ ॥

वसार्थम् ॥

अजो वा श्वेतः पायस एव वा ॥ १७ ॥

पायस एवैको हविः स्यात् । पशोर्निवृत्तिरेवास्मिन् पक्षे। होमेऽपि वसाया निवृत्तिरेव ॥

मध्ये वेश्मनो वसां पायसं चाज्येन मिश्र-मष्टगृहीतं जुहुयाद्वास्तोष्पत इति ॥१८॥

यावदन्तर्गृहायाममध्ये रज्जुचतुष्टयं कृत्वा प्रतिदिशं मध्ये वेश्मनः प्रतिकोणं चायम्यान्तर्गृहरज्जुसङ्गमदेशे रज्ज्वन्तरेषु च प्रागुपक्रमं प्रदक्षिणं गोमयेनोपलिप्य शमीपलाशश्रीपर्णीनां पत्रैः पुष्पैस्तण्डुलैश्च गृहं सर्वतः प्रकीर्य मध्ये उपलिप्ते प्रपदान्तं कृत्वा कृत्स्ने गृह्योऽग्नौ व्याहृतिभिराज्यं हुत्वा वसां पायसं च मिश्रीकृत्याज्येन च मिश्रितादष्टावदानानि जुह्वां गृहीत्वोपस्तरणाभिघारणवर्जं 'धानावन्तम्' इति गीत्वा[1] 'वास्तोष्पते' इति जुहुयात् ॥

याश्च पराः ॥ १९ ॥

याः पराश्च 'हये राके' इत्याद्याश्चतस्रः ताभिश्च जुहुयात् । चकारात्पूर्ववदष्टगृहीतम् ॥

सप्तालक्ष्मीनिर्णोदे ताभिश्च ॥ २० ॥

---

[1] गृहीत्वा. पा.

ताभिरिति प्रकृतापेक्षत्वाद्याः परा इत्यनुकृष्यते । अलक्ष्मीनिर्णोदे याः परा वामदेव्यग्निर्मर्महाव्याहृतिभिः प्राजापत्ययेति सप्त ताभिश्च जुहुयात् । चशब्दः पूर्ववत् ॥

हुत्वा दिशां बलीन् नयेत् ॥ २१ ॥

हुत्वेति स्विष्टकृत्प्रतिषेधार्थं, उक्तान्येव हवींषि हुत्वेति तत्प्रतिषेधात् । नात्राज्यभागौ स्तः, । तेषामभावात् पुरस्ताद्व्याहृतिहोमाः स्युः । गानान्तं समाप्य बलिहरणम् । नात्र हविरुच्छिष्टप्राशनम्, नापि तस्य ब्राह्मणे दानं, तस्य बलिहरणे विनियोगात् । उक्ता बलिहरणमन्त्राः सामविधौ—'अथातो वास्तुशमनम्' इत्यादिना । तत्सर्वे मन्त्रशेषत्वेन परिगृह्यते । कथमेतदवगम्यते? 'पायसं हविः' इति वक्तव्ये बहुलवचनाद्धिभक्तिव्यत्ययः कृतो बह्वन्नानुरूपमपि विद्यत इति सूचयितुम् । अत एव दिग्ग्रहणं मध्यस्याप्युपलक्षणार्थम् । उपलिप्तस्थानेषु पलाशमध्यमपत्राणि स्थापयित्वा तेषु बलीन्निदध्यात् 'प्रजापतये स्वाहा' इति मध्ये, 'इन्द्राय स्वाहा' इति पूर्वे, 'वायवे स्वाहा' इति दक्षिणपूर्वे, 'यमाय स्वाहा' इति दक्षिणे, 'पितृभ्यस्स्वाहा' इति प्राचीनावीती पितृतीर्थेन दक्षिणपश्चिमे, यज्ञोपवीत्यप उपस्पृश्य 'वरुणाय स्वाहा' इति पश्चिमे, 'महाराजाय स्वाहा' इत्युत्तरपश्चिमे, 'सोमाय स्वाहा' इत्युत्तरे, 'महेन्द्राय स्वाहा' इत्युत्तरपूर्वे, 'वास्तुकाय स्वाहा' इति भूमौ यत्रकुत्रचित्, 'नमो ब्रह्मणे' इत्युपरिष्टात् । एष एव बलिक्रमः । सर्वेषां वैश्वदेववत् उभयतः परिषेकः ॥

अवान्तरदिशां चोर्ध्वावाचिभ्यां च ॥ २२ ॥

एतत्पूर्वप्रोष्ठपदे नक्षत्रे कार्यम् । एवं कृते बहुपशुधनधान्यहिरण्यमायुष्मत्पुरुषं वीरसूसुभगाऽविधवस्त्रीकं शिवं पुण्यं वास्तु भवति ॥

एवं संवत्सरे संवत्सरे नवयज्ञयोर्वा ॥ २३ ॥

षट्सुषट्सु मासेषु प्रोष्ठपद एव । चतुर्षु मासेषु वा । तथा श्रुतेः । बहुकृत्वः करणे फलभूयस्त्वम् ॥

वशांगमावित्येताभ्यामाहुतिं जुहुयाद्यमिच्छेद्वशमायान्तं तस्य नाम गृहीत्वाऽसाविति वशी हास्य भवति ॥ २४ ॥

मम विष्णुशर्माऽयं वशमेत्वितिनाम गृहीत्वा ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
चतुर्थस्य पटलस्य
द्वितीयः खण्डः.

अर्धमासव्रती पौर्णमास्यां रात्रौ शङ्कुशतीं जुहुयादेकाक्षर्ययाऽऽयसान्वधकामः ॥ १ ॥

'आकृतिम्' इति मन्त्रं वक्ष्यमाणतया शनैः ध्यायन् जुहुयात्। आयसशङ्कूनामेकैकमनु यज्ञियस्य वृक्षस्य शङ्कुनाऽपि जुहुयात् ॥

खादिरानायुष्कामोऽथापरम् ॥ २ ॥

अर्धमासव्रतिन एव खादिरशङ्कुभिः कर्तव्यं कर्मान्तरमित्यर्थः

प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य स्थण्डिलं समूह्य

पर्वते वाऽऽरण्यैर्गोमयैस्तापयित्वाऽङ्गारान-
पोह्यास्येन जुहुयात् ॥ ३ ॥

अथेति प्रकृतापेक्षत्वात् अर्धमासव्रती, अपरमिति खादिरशाखाभिः आकूतिमित्यनयाऽपरं कर्म कुर्यादित्यर्थः । आरण्यैरशुष्कैर्गोमयैः स्थण्डिलमतिशयेन तापयित्वाऽग्निमपोह्य तस्यां भूमौ वक्रेण शङ्कुशतं जुहुयात् ॥

द्वादश ग्रामा ज्वलिते ॥ ४ ॥

खादिरशङ्कुना तप्तभूमिसंयोगाद्यदि ज्वलनं स्यात्तदा द्वादश ग्रामास्तस्य होमात्सिद्ध्यन्ति ॥

त्रयवरा धूमे ॥ ५ ॥

धूममात्रे जाते त्रयवरग्रामास्सिद्ध्यन्ति ॥

कम्बूकान् सायंप्रातर्जुहुयान्नास्य वृत्तिः क्षीयते॥

शङ्खवलयान् 'आकूतिम्' इत्यहरहर्जुहुयात् । स्वाहेति द्वितीयाम् ॥

इदमहमिममिति पण्यहोमं जुहुयात् ॥ ७ ॥

येन येन पणते तेन तेन होमं हुत्वा व्यवहारतो द्रव्यवृद्धिर्भवति । द्रव्यानुसारं च तन्त्रं, परिचरणतन्त्रं चेत् स्वाहेति द्वितीयाऽऽहुतिः ॥

पूर्णहोमं यजनीये जुहुयात् ॥ ८ ॥

'पूर्णहोमम्' इति मन्त्रादिः । इतिशब्दाभावो मन्त्रलिङ्गानुसरणार्थः । अतो यशः फलम् ॥

इन्द्रामवदादिति सहायकामः ॥ ९ ॥

स्पष्टम् ॥

अष्टरात्रोपोषितः प्राङ्वोदङ्वा ग्रामाच्चतुष्पथे समिद्ध्याग्निमौदुम्बर इध्मः स्यात् स्रुवचमसौ च जुहुयादन्नं वा इति श्रीर्वा इति ॥

स्रुवचमसौ चौदुम्बरौ चमस आज्यधारणार्थः । 'अन्नं वा इति द्वाभ्याम्' इति सिद्धे पृथग्ग्रहणं विषयबहुत्वार्थं, अतः 'उपतापिहोमे, अक्षेमे पथि' इत्यत्र चानयोरप्यनुवृत्तिरिसद्धा भवति । अन्यथाऽऽनन्तर्यात् 'अन्नस्य' इत्येकस्यैवानुवृत्तिस्स्यात् ॥

ग्रामे तृतीयामन्नस्येति ॥ ११ ॥

तृतीयामिति पूर्वेण निर्देशः पूर्वाभ्यामस्य वक्ष्यमाणे फले समुच्चयार्थः ॥

आधिपत्यं प्राप्नोति ॥ १२ ॥

सर्वेषां स्वामित्वम् ॥

उपतापिनीषु गोष्ठे पायसं जुहुयात् ॥ १३ ॥

व्याधितासु गोषु तन्निर्हरण मेवेदम् । द्वितीयानिर्देशात् सर्वं जुहुयात् पूर्वोक्तैस्त्रिभिर्मन्त्रैः । अतो न स्विष्टकृत् तदभावान्नाज्यभागौ, तेषामनारभ्याधीतौ व्याहृतिभिर्होमास्स्युः ॥

अक्षेमे पथि वस्त्रज्ञातीनां ग्रन्थिं कुर्यात् सहायिनां च स्वस्त्ययनानि ॥ १४ ॥

क्षेमसापेक्षे पथि गच्छन्नात्मनः सहायिनां च वस्त्रदशानां ग्रन्थिं कुर्यात् 'अन्नं वा' इत्यादिभिर्मन्त्रैः ॥

क्षुधे स्वाहेत्येताभ्यामाहुतिसहस्रं जुहुयादाचितसहस्रकामः ॥ १५ ॥

यावद्द्रव्ये सति द्रव्यसंचयवानयमिति लौकिका आहुः तत्सहस्रगुणितमस्य फलम् ॥

वत्समिथुनयोः पुरीषेण पशुकामः, अविमिथुनयोः क्षुद्रपशुकामः ॥ १६ ॥

पुरीषेण 'क्षुधे स्वाहा' इत्येताभ्यामाहुतिसहस्रम् ॥

हरितगोमयेन सायंप्रातर्जुहुयात् नास्य वृत्तिः क्षीयते ॥ १७ ॥

आर्द्रगोमयेन 'क्षुधे स्वाहा, क्षुत्पिपासाभ्यां स्वाहा' इत्येताभ्यामेव होमः। जुहुयादिति प्रकृते पुनर्वचनं आहुतिसहस्रनिवृत्त्यर्थं द्विजातिविहितवृत्तरक्षयः फलम्। अहरहर्होमः ॥

इति रुद्रस्कन्दकृतायां खादिरगृह्यवृत्तौ
चतुर्थस्य पटलस्य तृतीयः खण्डः.

विषवता दष्टमद्भिरभ्युक्षन् जपेन्मा भैषीरिति॥

विषनाशः फलम् ॥

स्नातकस्संविशन् वैणवं दण्डमुपनिदध्यात्पुरगोपायेति स्वस्त्ययनम् ॥ २ ॥

शयानस्समीपे निदध्यात् । उपद्रवरक्षा फलम् ॥

हतस्त इति क्रिमिमन्तं देशमद्भिरभ्युक्षन् जपेत्।

क्रिमिनाशः फलम् ॥

पशूनां चेदपराह्णे सीतालोष्टमाहृत्य तस्य प्रातः पांसुभिः प्रतिष्किरन् जपेत् ॥ ४ ॥

पशूनां क्रिमिनाशो भवेदिति यः कामयेत स सायाह्णे काले सीतालोष्टं कृषिदेशे कृष्टभूमृत्तिकाम् वैहायसीं कुर्यात् । पूर्व एव मन्त्रः ॥

मधुपर्कं प्रतिगृह्ष्यन्निदमहमिमामिति प्रतितिष्ठन् जपेत् ॥ ५ ॥

दातुः परिचारकैराहृतेषु विष्टरादिषु मधुपर्कार्थं गां ध्यायन् 'अर्हणा' इति जपेत् मन्त्रलिङ्गात् । तत उदगग्रेषु दर्भेषु तिष्ठन् 'इदमहमिमाम्' इति जपेत् ॥

अर्हयत्सु वा ॥ ६ ॥

मधुपर्कदानकाले वा ॥

विष्टरपाद्यार्घ्याचमनीयमधुपर्काणामेकैकं त्रिर्वेदयन्ते ॥ ७ ॥

पञ्चविंशतिदर्भमयौ कूर्चौ विष्टरौ । पादप्रक्षालनार्थमुदकं पाद्यम् । पुष्पसंयुक्तमुदकमर्घ्यम् । आचमनार्थमुदकमाचमनीयम् । दाधिमधुघृतसंयुक्तो मधुपर्कः । तेषामेकैकमादाय तस्य तस्य प्रदानकाले त्रिस्त्रिर्ब्रूयादाता । विष्टरौ युगपत् । विष्टरौ,

पाद्यं, अर्घ्यं, आचमनीयं, मधुपर्कः इति वक्तव्ये मधुपर्काणामिति बहुवचनं पूजार्थं, दातुरभ्युदयसूचनमेव पूजा ॥

गां च ॥ ८ ॥

गोदानकाले गामालभ्य गौर्गौर्गौरिति त्रिर्ब्रूयात् । पृथक्सूत्रकरणं गोस्तत्कालाहरणार्थम् ॥

उदश्वं विष्टरमास्तीर्य या ओषधीरित्यध्यासीत॥

विष्टरावितिं त्रिरुक्ते तावाहाय एकतुदगग्रमास्तीर्य तस्मिन् 'या ओषधीः' इति पूर्वेणासीत ॥

पादयोर्द्वितीयया द्वौ चेत् ॥ १० ॥

वक्ष्यमाणैर्मन्त्रैः पादौ प्रक्षाल्य द्वितीयं विष्टरमुदगग्रमधस्तात् पादयोः 'या ओषधीः' इति द्वितीयया स्तृणुयात् । चेच्छब्दात् पादयोर्नित्यो विष्टरः । तदा विष्टर इति त्रिर्वचनम्॥

अपः पश्येत् यतो देवीरिति ॥ ११ ॥

पाद्यमिति त्रिरुक्ते तूष्णीमादाय मन्त्रेण पश्येत् ॥

सव्यं पादमवसिञ्चेत् सव्यमिति । दक्षिणं दक्षिणमिति ॥ १२—१३ ॥

स्पष्टे ॥

उभौ शेषेण ॥ १४ ॥

'पूर्वमन्यम्' इति मन्त्रेणोभौ पादाववसिञ्चेत् ॥

अन्नस्य राष्ट्रिरसीत्यर्घं प्रतिगृह्णीयात् ॥ १५ ॥

अर्घ्यमिति त्रिरुक्ते मन्त्रेण प्रतिगृह्य तूष्णीमात्मानमभ्युक्षेत् ॥
